नं० ५६३-ख-२-ख

किरातार्जुनीयम्

(काव्यम्)

सर्गाः १२ तः १५ पर्य्यन्तम्

पत्राणि ५३-२-ख

१८५

नं० ५६३ - १ - चक्र

(भारविकृतम्) किरातार्जुनीयम् (काव्यम्)

पत्राणि ५३

कि॰ का॰ टी॰
पं॰ स॰ १३
१

श्रीगणेशाय नमः वपुषेति अथेश्वरस्यानंतरं महेंद्रसूनुरर्जुनः परमेण वपुषा हेतुना भूधराणां विभेदे विदारणे संभाव्यं पराक्रमं यस्य स तथो।
यमिति प्रतर्क्यो रूपं स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यामुग्रं मुखं यस्य तं मृगं वराहमित्यर्थः आशु द्रागमनानंतरं अविलंबेनेत्यर्थः विलोकयांबभूव ददर्श अ
स्मिन्सर्गे आकृपंचत्रिंशत् श्लोकादौपछंदसिकं वृत्तं वैतालीयानंतरं तस्यैवांतेधिके गुरौ स्यादौपछंदसिकं कवींद्रहृद्यमिति लक्षणात् १ स्फुटेति स्फु

वपुषा परमेण भूधराणामथ संभाव्यपराक्रमं विभेदे मृगमाशु विलोकयांचकार स्थिरदंष्ट्रोग्रमुखं महेंद्रसूनुः १

स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधारितान्यकार्यः जयमिछति तस्य जातशंके मनसीमं मुहुरादेदे वितर्कं २

टबद्धा स्फुटविरचिता सटानां केसराणां उन्नतिरुद्गतिर्यस्य स क्रोधात् हृषितरोमेत्यर्थः सटाजटाकेसरयोरित्यमरः दूरादभिधावन्नतथाविधी
रितान्यकार्यः अनन्यकर्मा स वराहो जयमिछति जयार्थिनि अतएव जातशंके स्वयं जिगीषोर्द्विषा येकलत्वादितिभावः तस्य मुनेर्मनसि मुहुरिमं वि
तर्कं वक्ष्यमाणमरठं अध्याहारस्तर्के चेत्यमरः आदधे उत्पादितवान् अथैकादशभिर्वितर्कमेव निरूपयति २ राम राम राम

१

घनेति घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णं निविदारितं शालमूलं शालवृक्षमूलं येन सः मूलं तु घ्रोणं घ्रिनामकः इत्यमरः निविडस्य निकाषेण कषणेन रुग्णः वप्रो भग्नसानुः अतो महासत्त्वसंपन्न इति भावः एकश्चासौ चरश्चेत्येकचरः एकाकी दर्पादरेणेत्यर्थः अतो यं वराहः समराय समरं कर्तुं क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी समाजुहूषमाण इव समाह्वातुमिच्छन्निव इवशब्दः संभावनायां समाङ्पूर्वात् ह्वेञः सन्नन्ताच्छानच्प्रत्ययः स्पर्धायामाङः इत्यात्मनेपदं अभ्यस्तस्य च इति संप्रसारणं मामभिवर्तते अभिधावति उपसर्गवशात् सकर्मकत्वं अतः सर्वथानापन्नोपेक्ष इति भावः ३

घ

घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकाषरुग्णवप्रः अयमेकचरोऽभिवर्तते मां समरायेव समाजुहूषमाणः ३

इह वीतभयास्तपोऽनुभावाज्जहति व्यालमृगाः परेषु वृत्तिं मयि तां सुतरामयं विधत्ते विकृतिः किं नु भवेदियं नु माया ४

इहेति इहाश्रमे तपोऽनुभावात् वीतभया लक्षणया विगतवैरा इत्यर्थः अत एव व्यालमृगाः क्रूरमृगाः व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदन्तिनि इति विश्वः परेषु प्राणिषु वृत्तिं जीविकां जहति हिंसया न जीवन्तीत्यर्थः अयं वराहो मयि मद्विषये तां वृत्तिं सुतरां विधत्ते जिघांसतीत्यर्थः तदियं विकृतिः तपःसामर्थ्यभंगरूपा भवेत् किं नु यद्वा माया कस्यचिद्दैत्यस्य वाहभूमिका भवेत् किंनु किंनुशब्दो वितर्के ४ एम श्री एम श्रीएम

कि० का० टी०
ध० सं० १२
२

अथैवेति अथैवेति पद्यान्तरेऽन्यमगः सर्वजन्मान्तरेऽभ्यासमनर्थमासेवितयाऽत एव परिचितयाऽऽत्मगोचरयैव बुद्ध्या कृतज्ञस्त्वमेव सर्वेषां जानन्नेव
वोत्प्रेक्ष्या नमुक्तः अद्यापि त्वन्न मितिशेषः त्वन्मयमेवागाभावी यद्वैरानुबंधीकश्चित्संजातिवैरवीजासंभवादिति भावः कुतः पदात् आरात्समीपस्थ आ
राद्दूरसमीपयोरित्यमरः विरोधिनीर्मृगजातीरवध्यत्वेन मामभियाऽन्यथानाभिधावत् इतिभावः नकेवलमभिधायाऽनमेवं किन्तु मनोवृत्तिरप्यत्र

अथैवैष कृतज्ञस्त्वमेव सर्वैरभ्यासमासेवितयाऽथ यानमुक्तः अमूमय विरोधिनीः किमारान्मृगजातीरभिजातिमांजवेन ५
नमतः खलु कोऽप्यपजिघांसुः स्खलति यत्र गयाऽभ्रंशं मनो मे विमलं कलुषीभवच्चेतः कथमेव हितैषिणं रिपुं वा ६

नेति अयं मृगो न खलु किंतु कोऽपि कश्चिदन्यः एव जिघांसुर्हंतुमिच्छुः हंतेः सन्नंतादुः अभ्याशपः अभ्याशाच्चेति कुत्वं अज्झनगमां सनीति दीर्घः कुतः हि यस्माद
दन्यस्मिन्नर्थे विषये मे मनः खलु यात्यभ्रंशं स्खलति दुष्यति यथा अयं जिघांसुः इति बुद्धिमुत्स्पृशतीत्यर्थः तथा हि विमलं प्रसन्नं सत् तथा कलुषीभवत् दुष्यच्च
चेतः स्वहितैषिणं मित्रं रिपुं वा अमित्रं च यथा कथयति यच्च मनः प्रसीदति तद्देवमित्रं अन्यथा त्वमित्रमेवेति निश्चितमित्यर्थः अतोऽयं वध्य इति भावः न
नु मुनेः किमु नया दुःशंकया तत्राह० ६ रामः

मुनिरिति मुनिरस्मि अतो निरागसो निरपराधस्य मे कुतो भयमित्येषोऽभिमानः अनपकारिणं मां कोऽपि किं करिष्यतीति बुद्धिः भू
तये श्रेयसे न भवति तथा हि परवृद्धिषु विषये बद्धमत्सराणां दुरात्मनां नाम लंघ्यं किमिवास्ति न किंचिदकार्य्यमस्तीत्यर्थः इवशब्दो वा
क्यालंकारे अस्तु जिघांसुरपि क्षुद्रः किं करिष्यतीत्यत्राह ७ राम राम राम श्री रामस्तु०

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलंघ्य ७
दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बतास्ति सत्त्वे अभिभूय तथा हि मेघनीलः सकलं कंपयतीव शैलराजं ८

दनुज इति अयं दनुजः स्वित् दानवो वा क्षपाचरो राक्षसो वा न तु मृग इवेत्यर्थः कुतो वनजे सत्त्वे वन्ये प्राणिनीति ईदृशं बलं नास्ति बत खेदे आश्चर्ये वा
बलमेव समर्थयते तथा हि मेघनीलोऽयं वराहः सकलं शैलराजं अभिभूय आक्रम्य कंपयतीव पदविक्षेपं भयान्न श्रवतीत्यर्थः अत्र कंपयतीवोत्प्रेक्षा
गर्भीयं शैलकंपनरूपकार्येण तत्कारणबलातिरेकसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः किंचायं मृगः कालबलः अयं तेनोप्यनन्यायापरिक
ल्पित इवेत्याह ८ राम०

कि॰ का॰ टी॰
घं॰ स॰ १२
२
3

अयमिति अयमेवसमस्यैशांतिनिष्टेऽतिरंधोक्तिः मयिअधिकरणविवक्षायांसप्तमी मायया प्रहरिष्यन्प्रहर्तुमिच्छन्नित्यर्थः कर्मणएवमृगव्यामा खेटकस्त्वसत्रंयत्तांतंकामयतइति आखेटकंमृगव्यंस्यादाहाखेटोमृगयास्त्रियाम् सत्रमाछादनेयज्ञेसदादानेवनेपिचेतिचामरः पृथुभिर्ध्वजैःतीरवैः सेनाका लकलैः समायाकल्पितैरवेत्यर्थः काननानिचकितोद्भ्रांतास्त्रपलायितामृगायेषुतानितथाचकार· अतएवरंध्रान्वेषणप्रहारार्थंस्वयमेवमृगयाभूर्भूत्वावनावरोध यसेनाघोषंकल्पयामासमृगरूपेणयातीत्यर्थः ९ ८ श्रीराम॰ ८

अयमेवमृगव्यसत्रकामःप्रहरिष्यन्मयिमाययाशमस्थे पृथुभिर्ध्वजिनीरवैकार्षीच्चकितोद्भ्रांतमृगाणिकाननानि ८
वितर्कितरमाह· बहुशःकृतसत्कृतेर्विधातुंप्रियमिच्छन्नथवासुयोधनस्य क्षुभितंवनगोचराभियोगाद्गणमाशिश्रियदाकुलंतिरश्चाम १०

बहुशइति अथवाबहुशःशतशःसत्कृतिःसत्कारोयेनतस्यसुयोधनस्यप्रियंमद्बधरूपंप्रतिप्रियंविधातुमिच्छन्कश्चिदितिविशेषः वनंगोचरस्थानंये तेषांवनेचराणामभियोगादवरोधात् क्षुभितमुद्विग्नमाकुलंचलाचलंतिरश्चांगणमाशिश्रियत् वराहरूपेणप्राविक्षत् वाणिश्रिद्रुस्त्रुभ्यः कर्तरिचङ् चङितिद्विर्भावः वितर्कितरमाह॰ १० श्रीराम श्रीराम श्रीराम श्रीराम श्रीरामरूप॰

अवलीढेति· उद्वृत्तेनोद्धरेण खांडवजातवेदसा खांडववनाग्निना प्रसभमवलीढः सनाभिर्ज्ञातिबंधुः सपिंडास्तु सनाभयः सगोत्रबांधवज्ञातिबंधुःस्वःस्वजनाः समाः इत्य
मरः अत एव समन्युः बद्धवैरः तस्यार्जुनस्यापकारयित्वादिति भावः अश्वसेनः तक्षकपुत्रः कश्चिन्महासर्पः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतो वा वराहमा
मयेति शेषः पुरा किल पांडवः खांडवदाहे पावकभयपलायमानां स्वतक्षकसूनोरश्वसेनस्यवंध्वा शिरश्छित्वा दाहयामासेति भारतीकथा अथ द्वाभ्यामनंतर

अवलीढसनाभिरश्वसेनः प्रसभं खांडवजातवेदसा वा प्रतिकर्तुमुपागतः समन्युः कृतवैरोयदि वार्हकोदरेण ११
बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः नियमेन मया निबर्हणीयः परमं लाभमरातिभंगमाहुः १२

बलेति किं बहुना यथा तथा वास्तु अयं मायिकः पारमार्थिको वास्त्वित्यर्थः उच्छेदपरां धियं दधानो मां जिघांसुरित्यर्थः अतोयं मृगो नियमेनावश्यं
मया निवर्हणीयो वध्यः प्रमापणं निर्व[illegible]हरणमित्यमरः तथाहि अरातिभंगं परमं लाभमाहुः ननु तपोविरोधिनी हिंसेत्याशंक्याह· १२
श्रीराम रामविष्णु श्रीराम रामविष्णु श्रीराम रामविष्णु श्रीरामस्तु॰

कि॰ का॰ टी॰

पं॰ स॰ १३ कुर्वीति हेतातवत्समार्गणादायीनभवतीत्यमार्गणादाधीरंधान्ये वित्तं अवेयामयस्कन्तियर्थः कुतः त्पार्थित्वादित्याह विजयायत्तपांसिकुर्विति मुनिर्यो सो
४ मामलंभ्यरामन्यशात् अनुष्ठितवान् शासेर्लुङ् ननु मुनिर्भगवान् कथमधर्ममन्वशात्तत्राह वलिनइतिवलिनः अवस्यास्यमृगस्यवधादृतेवधंविना अ
न्यागादित्यादिनापंचमी अन्यथा पापांतरेणव्रतसंरक्षणं तपोरक्षणं कर्तुनाशक्यंचहिंसापि दुष्टनिग्रहात्मिकानांधर्मइत्यर्थः १३ १३

कृततानपांस्यि मार्गणादायी विजयायेत्यलमन्वसन्मुनिर्मा कलिनश्च वधादृतेस्य शक्यं व्रतसंरक्षणमन्यथानकर्तुं १३
इतितेनविचिंत्यचापनामप्रथमंपौरुषचिह्नमाललंबे उपलब्धगुणः परस्यभेदे सचिवः शुद्धइवाददेचबाणः १४

इतीति तेनार्जुनेन इतीत्थंविचिंत्यविवितर्क्यचापनामचापाख्यं प्रथमंपौरुषचिह्नंतस्यमुख्यायुधत्वादितिभावः आललंबगृहीतं कर्मणिलिट् अथप
रस्यशत्रोर्भेदेविदारणे उपायेउपलब्धगुणोज्ञातशक्तिः बाणःस्फुरत्प्राप्तमौर्वीकस्थेतिशेषः शुद्धः ऋजुः दिग्धत्वादिदोषरहितोवानकारणभेदेनदिग्धेनाग्नि
ज्वलितेनजस्रेरितिनिषेधात् अन्यत्रोपधाशुद्धः बाणश्चसचिवइवाददे अत्रबाणसचिवयोः सवधमात्रसाधर्म्यात्श्लेषालंकारात्प्रकृताप्रकृतविषयइतिस
र्वस्वकारः उपमेवेतिकेचित् १४ १४

।अन्विति गुरुमहत्त्वज्यं वस्थिरत्वात्सारवत्वादविसंवादिअभंगुरं अन्यत्र प्रतिष्टितत्वादसत्यरिहितं गुणवत्तस्य मव्यसौदार्योदिगुणवन्नधनुर्मित्रवानुभा
ववतानिश्चितंबुद्धिमा अनुभावःप्रभावेचसतांचसतितिनिश्चयइत्यमरः धनंजयेनस्ववलव्यसनेपिततपसाक्षीणत्वेपि अत्रस्वंधनंतदेववलंतस्य क्लेपेपिपी
डयमानमाकृष्यमाणमपरुध्यमानंचसन्मित्रमिवानतिंनम्रतांमानुकूल्यंचप्रपेदे। अलंकारस्तु एवंवित् १५ श्रीरामस्तु १५

बलस्य:

कुलकं अनुभाववतागुरुस्थिरत्वादविसंवादिधनुर्धनंजयेन स्वबलव्यसनेपिपीड्यमानंगुणवन्मित्रमिवानतिंप्रपेदे १५
प्रविकर्षनिनादभिन्नरंध्रः पदविष्टंभनिपीडितस्तदानीं अधिरोहतिगांडिवंमहेषौसकलःसंशयमारुरोहशैलः १६

प्रविकर्षेति तदानींमहेषौगांडिवमर्जुनधनुरधिरोहतिसति अर्जुनस्यतुगांडीवगांडीवंपुनपुंसकमित्यमरः गांडवअगास्तंत्तायामितिवप्रत्ययः प्रति
प्रकर्षेणायोनिनादस्तेनभिन्नरंध्रोविदलितगह्वरस्तथापदविष्टंभेनपदाक्रमणेननिपीडितोतुभःसकलःसमस्तःशैलःसंशयंजिविातसंशयं आ
रुरोहप्रापेत्यर्थः अत्रशैलस्यसंशयासंबंधेपिसंबंधाभिधानादियमतिशयोक्तिः १६ श्रीराम श्रीरामस्तु १६

कि॰ का॰ टी॰

छं॰ स॰ १३ ददृशेइति अत्रसंधानानंतरंशिवेनास्थिरंनिश्चलंसृणींचयथातथाआयते आकृष्टेचापमंडलेतिष्ठतीतितथोक्तः चापमंडलमेतद्बीवस्थितइत्यर्थः तिसृणां

५ नतिसूचनस्फूर्तिदीर्घव्रतिबेधः पुरांवधंसंहारंविधातुंकर्तुंरचितः कलितःस्थानविशेषस्थायितइतियावत् आत्मास्वयमेवपरेषांभयानकोभयं(

करः सोऽर्जुनः सविस्मयंददृशेदृष्टः उपमालंकारः अथापिनाकित्वमाह॰ ७ श्रीराम ७ श्रीरामस्तु॰ ७

ददृशेथसविस्मयंशिवेनस्थिरपूर्णायतचापमंडलस्थः रचितस्त्रिसृणांपुरांविधातुंवधमात्मेवभयानकःपरेषां ७

विचकर्षचसंहितेषुरुच्चैश्चरणास्कंदननामिताचलेंद्रः धनुरायतभोगवासुकिज्यावदनग्रंथिविमुक्तवह्निशंभुः १८

विचकर्षेति अथशंभुश्चसंहितेषुःसन्उच्चैर्भृशंचरणास्कंदनेनपदविष्टंभेननामितः अधोनीतोऽचलेंद्रोयेनसतथोक्तःसन् आयतभोगः आकृष्टका

योवासुकिरेवज्यातस्यावदनमेवग्रंथिस्तेनविमुक्तः उत्सृष्टोवह्निर्येनसतथोक्तःधनुर्विचकर्षइतिस्वभावोक्तिः १८ १८ विष्णुजी

रम्म राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम रामरामस्तु॰

सहेति सहसंभूय त्र्यथमद्विधरूपं प्रणोयन्तं विधास्यतेतः कथं रिख्यतेः अन्यत्र सहार्थमभिधेयमभिधास्यतोरित्यर्थः इति प्रत्ययौ सहार्थं व्रतइ
तिवचनात् भवत्यये कहेतो : शंशांरोच्छेदनिदानस्य भवस्य शिवस्य सितसभेरजुनस्य च मध्यंसारिवर्वरात् यस्मात्प्रत्यययोर्विधौ यत्तोसाप्रकृतिः धा
त्वादिः सत्ययः सनादित्यथोमध्यं अनुवंधुइत्संज्ञ कोवारणः यथाभृतंभृति रित्यादौ ककारः सद्दवपराभवाय लोपार्थमेव आपनतुस्थित्यर्थमित्यर्थः १९

सभवस्य भवद्दैकहेतोः सितसभेऽश्वविधास्यतोऽसहार्थं रिपुरापपराभवायमध्यप्रहितेःप्रणयेऽरिवानुबंधः १९ ॥
अपदीपि तवारिवाहवर्माऽरवविद्रासितवारणाऽरवार्यः निपपात जवादिषुपिनाकात्महतोऽभ्रादिव वैद्युतः कृशानुः ॥

अपेति अथ रिपोर्मध्यप्रवेशानंतरं दीपिते वारिवाहवर्त्म आकाशं येन सः अवार्यो दुर्वारिषुः रवविद्रासितवारणात् सर्वेषां भाषितदिग्गजात्
पिनाकात् महतोऽभ्रात् मेघात् विद्युतोऽयं वैद्युतः कृशानुरिव जवात् इषुः पपात आदुधाव २० राम श्रीरामकृष्ण २०

कि. का. टी.
धं. स. १३
६
6

अजित इति अजितेऽधावतोऽस्य बाणस्य रहयः पत्रेभ्यः पतद्भ्यो जन्म जैस्य सततथोक्तः रुततार्क्ष्येऽपि निपातवेगशंकाऽऽगरुडागमनवेगभ्रमो येन सः अत एव महोरगाणां हृदयानि श्रोत्राणि च भिनत्तीति हृदयश्रोत्रभित् सम्भुद्भ्राजाद् इति क्विप् इति श्रोत्रादेव व्यभिचारात् श्रोत्रशब्दस्य एवं निपातव्यभिचारः प्रतिनादैः प्रतिध्वनिभिः महान्संमर्द्धितो नाद उत्पपात उत्थितः अत्र नादस्योरगहृदयभेदकत्वासंबंधेऽपि संबंधाभिधानाद् अतिशयोक्तिः सा च तार्क्ष्यवेगभ्रमो ह्यापितेति तयोः

थे अजितेऽस्य रयस्य जन्मना हृततार्क्ष्यनिपातवेगशंकः प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदापपात नादः २१
नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशंगैः विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः २२

नयनादिति शूलिनो नयनात्प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षा नेत्राग्निशिखाकल्पैरित्यर्थः पिशंगैर्विलसत्तडिल्लताभैर्विद्युद्दामतुल्यैरित्युपमा मनसश्चित्ताद् प्याशुतरं शीघ्रतरं आशुशब्दादव्ययात्तरप् अतः किमेत्तिङव्ययेत्यादिना नाम् प्रतिषेधः स्त्रीवेशीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यद् इत्यमरः यतो गच्छतः इषुः शरः प्रत्ययः मार्गणस्य शरस्य कलंबमार्गणशरा इत्यमरः किरणैर्व्योमनि मार्गः उल्कारेखाकारः पंथा विदधे विरचितः इति स्वभावोक्तिरलंकारः २२

२२

अपपन्निति एषकोवाणः एषत्कवाणविशिखाइत्यमरः धनुषःपिनाकात् अपयन् इणःशतृप्रत्ययः शिवांतिकस्थैर्नभश्चरैरभिख्ययाशोभयाजिहानःशो
भमानःगच्छन्नित्यर्थः उहाङ्गतावितिधातोःशानच् अभिख्यानामशोभयोरित्यमरः विवरेसीदंतीति विवरेसदस्तैर्विवरे सद्भिरंतरालवर्त्तिभिर्नभश्चरैः सत्सूद्विषे
त्यादिनाक्विप् नतुरुपेकृतेवहुलमित्यलुक् अथश्चाहंविशन् तद्गुणोढैः प्रत्यासन्नैः वेहैःकर्त्रीरिक्तःनभश्चरैश्च सुगपदृहृशेदृष्टः इतिवाणवेगोक्तिः अत्रप्रेव
शनिःक्रमणादिक्रियाविशिष्टस्यशिवांतिकादिभिन्नदेस्यनभश्चरकर्तृकदर्शनयोगपद्यासंवंधेपितत्संवंधोक्तिमत्वातिशयोक्त्यालोकोत्तरवेगप्रतीतेरलंकारेण

अपपन्धनुषःशिवांतकस्थैर्विवरेसद्भिरभिख्ययाजिहानःयुगपद्ददृशेविततचाहं तद्गुणैर्नभश्चरैरेषकः २३
शतमालनिभेरिपौसुराणांघननीहारइवाभिषक्तवेगः भवविष्णुतमीहितोवनैरेर्जगतीग्याहइवापगाजगाहे २४

सद्गति सवाणस्तमालनिभेनीलभइत्यर्थः सुराणांरिपौवराहेघननीहारेसांद्रतुहिनइवाविषक्तवेगोःप्रतिबद्धवेगःसन्तथानभस्येखेचरैरेजयेन
विष्णुतंविद्धुलंयथातथाईहितःसन् अपांसंवंधीवेगश्चायः अपांसमूहोवाअपयंत्रापेवनयनात्वापगानदीतांगंगांवतीतिग्राहोजलचरइतिवक्रव्याद
विभाषाग्रहइतिणप्रत्ययःसइवजगतींमहींजगाहेविद्धवंमहामितिवेजयन्ती जगाहेविवेशाक्रांतमहीतिडत्यर्थः अथार्जुनकाराप्रयोगमाह॰ २४

किं का टी
धं स १७
८
७

सपदीति॰ सपदि शिववाणपातसमयस्त्वं त्रया नूपमा कृतिः पुर्खाणि गंधकोरखा रचनाश्रयस्यसः अंगुलिप्रदेशरखाः प्रसिद्धाः सितंतीक्ष्णं लोहाग्रमयः फलं तन्नखानि चेत्युपमितसमासः शितंलोहाग्रनखंयस्यसः कुपितस्यांतकस्यभ्रष्टयोयामर्जुनस्यांगुलिस्तर्जनीतस्याः श्रीरिवश्रीर्यस्यसकपिध्वजेषुरर्जुनवाणः प्राणभ्रष्टो यथयत् भीषयन्भीवयमाणः एकामासमासस्माद उपमालंकारः २५ रामकृष्ण श्रीरामरामकृष्ण २५

सपदिप्रियरूपपर्वरेखः शितलोहाग्रनखः खमाससाद कुपितांतकतर्जनांगुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषुः २५॰
परमास्त्रपरिग्रहोरुतेजःस्फुरदुल्काकृतिविक्षिपन्वनेषु सजवेन पतन्परःशतानांपततांव्रातइवारवंवितेने २६

परमेति परमास्त्रपरिग्रहेण दिव्यास्त्राधिधिष्ठानेनउरुमहत्तत्स्फुरदुल्काकृतिउल्कावद्दीप्यमानमित्यर्थः तेजोवनेषु विक्षिपन्विकिरन् जवेन पतन् धावन् सवाणः शतान्परे परःशतास्तेषांशताधिकसंख्यानामित्यर्थः परःशताद्यास्तेयेषांपरासंख्याशताद्रिकेत्यमरः पंचमीतियोगविभागा त्समासः राजदंतादिषुपरमित्युपसर्जनस्यशतशब्दस्यपरेनिपातः व्रातःसमूहे इवव्रातरवंवितेने॰ २६ २६ श्रीरामरामरामराम

२६ अविभाविते त्ति अतिरंहसा अतिवेगेन अविभाविते अलक्षितो निःक्रमोऽङ्गहीकान्तिः सवर्णं प्रयाणं अंकनगमनं च यस्य स तथा शमितायामः संक्षिप्तदैर्घ्य इव स्थित इत्युत्प्रेक्षा
वेगगुणाभिभिन्नाद् दैर्घ्यगुणाभावोत्प्रेक्षा सशरः सह नु सर्व चित्ररहने निशेषः चित्ररहेतेः सर्वं तरं नु प्रावेगेन वा उभयप्राप्ति लक्षितेय तित्व तिशेषः अथवा अपवितित्वानुलक्ष्य इति
शेषः लक्ष्मभेदं चकार अत्रानुपात्तवेगगुणानिभिन्नाद् दारुणास्य च चित्रपत्रिसहपातनसर्वं कृतं सर्वं पातपातभावोऽत्रैदोषोऽस्ति सडबरोऽत्र रोत्कर्षेण वेगातिशयव्यंजिकाऽस्त्यलंकारेण

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः सहसर्वबलं नु चित्रगत्वज्ञेरपवित्वानुचकार लक्ष्मभेदं २७
सरथध्वजसायकावभिन्नं जयहेतुं प्रतिकायमेषणीयं लघुसाधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः २८

स इति जयहेतुः स शरो रथध्वजसायकावभिन्नमशिवशरविद्धं एषणीयं वेद्धुमिति शेषः इषेरिच्छार्थादनीयर् प्रत्ययः प्रतिकायं प्रतिपक्षं विधिना विधात्रा
वेदेनोदीरितं फलसाधनत्वया प्रतिपादितमर्थं यागादिकं प्रयत्नः पुरुषव्यापार इव लघु अक्लेशेन साधयितुं प्रसेहे शशाक ॥ २८ श्रीरामकृष्णा

॥कि॥ ॥का॥ ॥टी॥
धं॥ ॥स॥ ॥१३॥
॥८॥

अविवेकोंतरानभिज्ञत्वं वृथाश्रमोनिः॥फलप्रयत्नः॥ तावर्थं धनमिव अस्थानाविनियोगहेतुत्वादनयोर्धनहानिकरत्वमितिभावः॥ क्षयोनुपचयः लोभोऽप्रदातृत्वं तौ संश्रितानामुपजीविनामनुरागमिव॥ अकिंकरे स्वामिन्यनुरागस्यानवस्थानादितिभावः॥ अनयोर्दुर्नीतिः प्रमादोऽनवधानता तौ विजिगीषुमिवरंध्रम् यिष्टस्यनयासिद्धेरितिभावः विशिखौ शिवार्जुनबाणौ तं वराहं अवसादं कारणशैथिल्यं विनिन्यतुर्नीतवंतौ॥ नपतिर्द्विकर्मकमालोपमेयम्॥ २९॥

४ क्षयः

अविवेकं श्रमाविवार्थं क्षयलोभाविव संश्रितानुरागं॥ विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तं॥२९॥
अपदीर्घतरं तमः प्रवेक्ष्यन् सरसानुगुणं रयः स संभ्रमेण॥ निपतंतमिवोष्णरश्मिमुर्व्यां वलयीभूततनुं धरां च मेने॥ ३०॥
सगणः क्षितिमुक्षशोणिताद्रां स्फुरदंगा ग्रनिपातदारितास्म॥ अभिभिः ततमोक्षितैः द्रुसत्तुर्विहिताभर्गगुरुर्धर्निरास॥ ३१॥ रयो

अपेति अपदीर्घतरं तमोदीर्घनिद्रां प्रवेक्ष्यन् मरिष्यन्नित्यर्थः सहसा रिति क्षणात् सोभग्नवेगः सवराहः संभ्रमेण भ्रांत्या संभ्रमो भ्रांतिः हावयोरितिविश्वः उष्णरश्मिमुर्व्यां निपतंतमिवमेने वभ्रामेत्यर्थः स्वभावोक्तिरियं ३० सगणेति क्षितिं गतः क्षितौ पतितः उक्षेन प्रत्यग्रत्वात् शोणितेनाद्रां स्फुरत्ताः ग्रुराः णांदं स्फुरद्भिः अग्राणि निपातेनाधातेन दारिता क्ष्मा पादितपाषाणाः किंचलदग्रमोक्षितैः द्रुसत्तः स्वार्थविधातरोषादितिभावः अत एवविहितः अमयगुरुः क्रोधोद्धतो ध्वनिः क्रंदनं येन सः तथोक्तः सवराहः अस्त्रभिः प्राणैर्निरासे निरस्तमस्य त्वक्तोद्वत्यर्थः अस्यतेः कर्मणि लिट् इयं स्वभावोक्तिः ३१ श्रीकष्ण रामल

स्फुटेति अथ वराहपातानन्तरं पार्थः प्राज्यशरः प्रभूतशरः शरान्विहाय पार्थः प्रभूतं प्रचुरं प्राज्यमित्यमरः स्फुटपौरुषं व्यक्तविक्रमं तं वराहभेदिनं शरं जिघृक्षु
गृहीतुमिच्छुः अथ हेमन्तं नाद्रुः अभ्ययः आपपात अजगाम आगत्य तत्र पार्श्व गृहीतुमनुलोमादित्यर्थः न च तेन पूर्वकृतं कर्त्तारं ऐश्वकिमित्यत्रैवादरः तत्राह नेति कृतवेदि
नां कृतावदानः कृतकर्मा अवदानं कर्म वृत्तमित्यमरः यथा प्रियतामेति यथा करिष्यन् उपचरिष्यन् प्रियतां नेति कृतकरिष्यमाणयोः कृतं बलीय इति भावः अथ पु
नर्युग्मेनाह ३२ उपकार इत्यादि ३३ सहसेति ३४ ३५ ३६

ष्य:

स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरं जिघृक्षुः न तथा कृतवेदिनां करिष्यन्प्रियतामेति यथा कृतावदानः ३२ यु
ग्मम् उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगेऽगतः प्रणामः कृतवानधिकामधोमुखत्वं गुरुताजितमौलिरिवान्यपौरुषेण ३३
सहसा दृढ़तां विचिन्त्य नेन न सहरुचं कीर्तिमिवात्मनां दधान अनुयुक्त इव स्ववार्त्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ३४

उपकार इति सवाणः असतिनीचे प्रयुक्तः उपकार इव मृगे स्थितिमप्राप्य प्रणामस्य दर्शनमिव गतः अप्युपमानतया स्वशक्तिः कृतवेधवः गुरुत्वात् लोहाग्रभरत्वान्महत्वा
च्चान्यमुखोन्मुखः अतस्तत्र आत्मपौरुषेण जनितात् ग्रीडइव स्थित इत्युत्प्रेक्षा ३३ स इति उत्तमां स्वरुचिं कीर्तिमिव दधानः इत्युत्प्रेक्षा विचिन्त्य मर्त्यधाज्ञानिकृतितिवि
म स्व उद्धृत्य तेनार्जुनेन उच्चैः स्ववार्त्तं स्वपाटवं वार्त्तं पाटवमारोग्ययोः सा स्यादित्यमरः मनामय मितियावत् अनुयुक्तः पृष्ट इव स्थित इत्युत्प्रेक्षया अदर्शनतया प्रतीयमानस्य
र्थः प्रश्नोऽनुयोगः पृच्छा चेत्यमरः सवाणो विलोचनाभ्यां भृशं परिरेभे नु आलिलिङ्ग किमित्युत्प्रेक्षा तेनात्मादरे लक्षितत्यर्थः ३४ ३५ कृपाणा

६९

कि॰ का॰ टी॰
ध॰ स॰ १२
९८

तेत्रेति तत्र देशे महाभुजोऽर्जुनो मकरकेतुविद्विषः स्मरवैरिणः शासनं वक्ष्यमाणमादेशं सन्निकाशयितुं निवेदयितुं इति यावत् अग्रतः स्थितं कार्मुकभृतं वनेचरं सहसाऽ
रान्पश्यति स्म इतः प्रभृति श्लोकद्वयात्मकं रान्नं वनविरहे तु तालव्यादिविजिलदाणात् ३५ मधेति स वनेचरो महीपते स्तनयेराजपुत्रेऽर्जुनेऽप्यात्मजातिसदृशीं कि
रातजात्यनुरूपां किल किल नतिं जोतरलीकेनां दर्शयति यतः परमार्थेन प्रथमस्वभावनतिं प्रणतिं प्रयुज्य सान्त्वपूर्वकं साम पूर्वकं संमतं सान्त्वपूर्वं सन्मेऽस्त्यमरः अ
भिनीतिहेतुकं प्रियं युक्तियुक्तं वचः इत्थं वक्ष्यमाणप्रकारेण वक्तुमुपचक्रमे तत्र तावच्चतुर्भिः सान्त्वमाह ३६ शांतेति शांततया वहिरंगदुष्पं तेन तवविनयधो

धर्मं तत्र कार्मुकधरं महाभुजः पश्यति स्म सहसा वनेचरं सन्निकाशयितुमग्रतः स्थितं शासनं मकरकेतुविद्विषः ३५ मध्
पुष्पतनवे महीपतेरात्मजाति सदृशीं किलानतिं सान्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ३६ शांततविन
यथोगिमानसंभूरिधाम विमलं तपः श्रुतं प्राह ते नु शहृधीद्दिवौकसां मन्वयापमवदर्तमाकृतिः ३७ दीपितस्त्वमनुभा
वसम्पदा गौरवेण लघयन्महीभृतः राजसे मुनिरपीह धारयन्नाधिपत्यमिव शातमन्यव ३८ भिन्नवैगुण्ययुक्तंमान

संभाव्य इत्थं तेन खलु तथा भूरि वसुधामतेजो यस्मिन् तत्र तपः कर्तृ विमलं संप्रत्ययमुपं श्रुतं प्राह किंच द्यौर्दिव वाग्माकाये वा दिवौकसां देवानां दृषोद्दण्डिचाला
धः दिवः स्वर्गे तरलेयोरिति विश्वः सहृधी तुल्या सम्याकृतिमूर्तिरेव तातं शुद्धमत्वमपैवं शं प्राह देशोत्त्ववायसंतानं इत्यमरः सांघ्यादिषि लिंगे विनयादयोऽनु
मीयंते अन्वयात् संभवादित्तिभावः ३७ दीपितस्त्वमिति मुनिः सन्नपि स्वर्गराहितो पीतिभावः अनुभावसंपदा प्रभावातिशयेन दीपितः प्रकाशितः
गौरवेण महत्त्वया महीभृतो गिरिनां पि लघयन्लघूकुर्वन् त्वमिहाद्री शातमन्यवो रिदं शांतमन्यवं राद्रूरत्स्वेदमिन्यु अत्राप्ययः कारयन्निवंइदं ऐतिशोषः राज

तापस इति विभुतां प्रभावमुपेपि वानुपगतः अत एव तापसोपि त्वं सर्वसंपदामाश्रयं स्थानमसि तथाहि भवतः सद्जनैर्विना विसर्जितैरन्वितस्य बहुलत्रिर्दरापते
अतः सर्वसंपदामास्पदं त्वं युक्तमित्यर्थः विस्मय इति किंच जपश्रियाहतुनाप्राप्य यादीति शेषः क इव विस्मयो न कश्चिदित्यर्थः यतो गुरुरापितत्तव वनदवी
रेव यसी दरजरादुर्लभा न भवत्येवास्य तदूरेत्याहि नाप्यगादिवरलोपः सर्वगुणाश्च निर्जितैरजस्तमसी एव गुणौ येन सकस्यैतत्सोपाश्रयस्यास्पदं न भेत् भवेदेवे
त्यर्थः अधागमनप्रयोजनमुपालंभमुखेनाह ४० रूपपन्नमिति विशाते जसा आह्हितो जसं उत्पते जस रूपयन्त लजयत् उपपन्नपौरुषः संभाविनो विक्रमः

तापसोपि विभुतामुपेपि वा नास्पदं त्वमसि सर्वसंपदां दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ३९ विस्मयः क इव वा
जपश्रिया नव मुनिरापितव वीपसी ईश्वरस्य न भवद्गुणाश्रयः कस्य निर्जरजस्तमोगुणः ४० रूपपन्नं हि महत्तेजसं त्वयि शास्त्वमित्यनुप
पन्नपौरुषः स्नहमिह स्वहाहमधिदिनं नमस्यदधिपस्य शाधिकं ४१ स्पर्धते तु भृशं सनातनं न्यायमाचरणमुत्तमैन्नृभिः ध्वंस
ते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ४२ आकुमारमुपदेशमिच्छवः संनिवृत्तिमपपातमहापथः योगमाशिजितजन्म

सहासि दुस्तव राज्यभेदित्तं कृतोपकारमित्यर्थः एवं तत्करागतं स्वदधिपस्य साध्यं कः त्वं साहसे तरुतैर्नाहसि अनर्हत्वमेवाह ४१ स्पर्धत इति उत्तमैर्नृभिः स
त्पुरुषैः मन्वादिभिस्तनुभृशं शरीरिणां सनातनं नित्यं न्यायं न्यायोपेतं सदाचारमिति यावत् स्पर्धते स्पर्धितिविषयीक्रियते उपदिश्यत इत्यर्थः सदाचारकर्णेदोष
स्माहि भवानिव दृश्यते भवादृशाः तव सदाचारान् ध्वंसते भ्रंसते यदि तेन वर्त्मना न्यायमार्गेण कः प्रयातु वदतु न कोपीत्यर्थः तथा च सन्मार्गव विलीनः स्यादिति
भावः ४२ आकुमारमिति किंच योगं आश्रमपा आत्मानमहिम्ना जितो जन्मना यैस्ते यतयो योगिनोपि कुमारेभ्यः आ आकुमारं कुमारानारभ्येत्यर्थः

कि. का. टी.
घं. स. १३
४६
10

आद्रुष्ट्यादामिविधेरोरित्यव्ययीभावः महत्त्वः आपदेयस्मिन्न स्मान्महतानर्थिनात्त इत्यर्थः अपपाटप्रागिरुपयोविभाषेति निषेधविकल्पात्समासांतः अपथंनपुं
सकंसान्निपुंन्निमपगानमनुपदेष्टमिकवः संतः सुशीलैर्नांसद्वृत्तानां शीले स्वभावे सद्वृत्तः इत्यमरः शीलयंति अभ्यस्यंति अतोनत्याज्यं शीलमितिमित्यर्थः नकेवलं
शीलादनुर्वनिवृत्तिः किंतु धर्मप्राप्तिरपीत्याह ४३ निहतमिति तपसिनिहतांतपोनिहतां धर्माधिनामित्यर्थः पुरुषंधर्ममासाद्य जनसंपादयन स्यादुभमासि
वांपुरुषश्रेयसीपुरुहूतं इत्यमरः सुखाधिसुखार्थिनां संपदः सुखसाधनभूतानधाननुगुणायन्ननुकूलयन् अर्थकामयोरपिहेतुभूतः इत्यर्थः तथा
योगिनांविमुक्तये परिणामनसंपद्यामानोविनयः सोऽशील्यकेनुहेतुनाशतांप्रियानास्कः संभावनायांलोट् सर्वथाविनयएव चतुर्वर्गसाधनमित्यर्थः अ

निहतांतपसितुरणमासजनसंपदोनुगुणयन्सुखैषिणं योगिनांपरिणमन्विमुक्तये केनमास्तुविनयः सतांप्रियः ४४ ननमभ
वनशरः ऋतिंसर्वथायमनुयातिमामकः सायसीमनुपपन्नशंशयः कारितस्त्वमपथेपदंयथा ४५ अन्यदीयविशिखेनकेव

अमलत्वयानास्मत्स्वामिशरसौर्यकार्यमितिनान्वर्थ्याधैः अयवाकिंभवादृशेषत्वसंभावनायाभ्रांतिरपिसंभाव्यतेमत्दृक्तिमवलंबते ४४ ननमिति ममायत्नदीयःसायकः
अत्रभवतंसज्यसमरज्यसत्वमयवानअभवामितिमतुनः अन्येभ्योपिदृश्यतइति सार्वविभक्तिकस्तमित्यन्नवः पुरुषेत्ति समासः शराकृतिंसर्वथानरूपेणरेखादिनासर्वप्रकारेण
मनुयाति अन्यंतमनुकरोतीत्यर्थः ननमितिवितर्कः यथाआकृत्यत्वमनुपपन्नसंशयोन्यतसादृश्यादुपपन्नत्वान्मदीयत्वसंदेहः सन्नुसोपमितिनियःस्वकीयः सएवाय
मितिभ्रांतिरेवोत्पद्यतइतिशेषः अपथेअमार्गेशरहरणरूपेपदंकारितः नियोजितइत्यर्थः हृत्कोरन्यतरस्यांइत्यणिकर्तुःकर्मण्यंतेकर्तुरकर्मकइतितत्रैवाभिहितो
कर्तृरिक्तः पुनरपित्वमेवदृढयन्तदोषांतरमापादयति ४५ अन्यदीयेति येनसाक्षइवन्नेनइतिमन्वेनसः तेअन्यदीयादिशिखयदूतमाहरणंभावेक्तः

तस्मिन् अनपेक्षाविशिष्टस्याहरणाइत्यर्थः निस्पृहस्य केवलं निस्पृहेणैव न भवितव्यं किंतु परार्थिनाहि तत्परेणापि हितमापादनीयमित्यूतः गृहस्थ रमणनिधानान्वयेत्यर्थः कृत्वा
नांकर्मरिवेति विष्टौ क्रीडितमंगलाङ्गितव्यमिति भावेन व्यप्रत्ययः संप्रति त्वया परिविष्टं विदुषापि न क्रीडतेत्युक्तस्त्वयं च क्रियत इत्यहो महत्साहसमित्यर्थः मृगमित्यत्र
शेषत्वाविवक्षितत्वात् जातिनिग्रहणनाटकाद्यविधौ हिंसायामितिषष्ठी न भवति सत्याधिकरणात्क्रीडाशरणपत्रसंधानं निगृहीतं विपर्यस्तानाटकरणात् अथास्मि
वकृतयज्ञाभियोगाय स्वोपकारकत्वं वर्णयितुं विकत्थनेहायं तावत्सुग्येनपरिहरन्नाह ४६ संततमिति अन्वेति युग्मं संततमिति सर्वथा विद्यमानस्य।

वलंनिस्पृहस्य भवितव्यमाहुर्ये निधृतः परिनिर्गतं मृगं क्रीडितमभिपतेस चोत्सः ४६ संततं निशमयंत उत्सुकाये प्रयांति
प्रवांतिमुत्सस्य मरयः क्रीडितानि हसितानि पतानि यं क्रीडयंति चारितानि मातिनं ४७ अन्यदेव यमिवमस्वकं गुणं रव्यापयेत्क।
पमधार्य नाजरुः उत्तमेस खलु कार्यवत्रयाधिगम्य भिन्नबुधसंतुमर्थितां तं ४८ संप्रति स्वकृतोपकारकं कथयति दुर्वचं

तानि स्वामिनः संबंधिपिर्यैश्चरितैः कारणभूतैः संततमुत्सुकाः सोत्कंठाः संततं चरितानि निशमयंतः चरितानि श्रुत्वैव तोष्टुं प्रयांति अत्र चरितानां मुत्साह्योशा वंका
रणत्वमिति विवेकः चरितानि हसितानि परिहासपिकानि नित्यपरेरु चारितानि संति मानितं क्रीडयंति मा क्रीडितान्क्रीडामनुचरितदोषानेषामकलंकदोषत्वादि
त्तिभावः ४७ अन्येति अथ स्वतयाऽविकत्थनेनशालीनतयाजडः अविकथनइत्यर्थः सोऽस्मत्स्वामीअन्यदेवं परावगुणमिवस्वकं स्वकीयं गुणं कथं रख्या।
पयेत् आत्मप्रशंसापरगर्हामितिचनवर्णयेत् इतिस्मरणादितिभावः विकर्णस्तु विभिन्नबुधसंतुमतिक्रांतसज्जनमर्यादां अर्थितां धिक् निंदामितथैवविवृणोि
वपयेत्वंविकत्थयितुं प्रविष्ट इतिभावः धिक्क्रिभर्त्सननिंदयोरित्यमरः अभिसर्वतसाकार्याधिगुपर्यादिषुत्रिषु नतोऽन्यत्रापिदृश्यते ४८ ४८

कि. का. टी.
धं. स. १३
११
||

दुर्वचमिति वाहिनीपतिहे नायितरस्मत्वाम्मामी । शिले नयत्रिरण शरेण एवं मं गं आस्तुन प्रत्यु पाल्यनतप कादिनाति युंजीत त्रयाति वेत अयमीम ग: आज सावेले नत्वयिविषयेय दकरिष्यात वदं निष्कुर्यान्न दुर्वचं अमंगलतया वक्तुमशक्यं तत इति ष्टमथानंतरमपि यासम्म दिति सोत्त्वार्ई कयन तदुपेद्दारेण समगस्त्वां हन्यादि दिति लिङ् निमित्ते लृङ् क्रियातिपत्ताविति के शेति पद्य ते श्च लुङ् न नु मन्यामयैव हतो न मम पतिनानन आह ४९ कइति हरितुरंगमायुधः [illegible] मिंद्रस्याशी धमायुधं वज्रं नद्वृतस्येव यसीं स्थिरतरां वज्रकठिनामित्यर्थः स्थिरशब्दादीयसुनि प्रियस्थिरे त्यादिना स्थादेशः अंगसंहतिं अवयवसंघातं दधतं वेगवत्तरं वेगमित्तमर्थः दुर्वारः
इमं दंष्ट्रिणं वराहं चमूपतेः अन्ते चमूपतिं विना अन्यारादित्यादिना पंचमी को नु को वा शरेण होकिं नेतिभावः हंतु महतीति कोपीत्यर्थः अस्तु स एव मम गर्स्य कृतान्ततः ।

नदधमास्त्रमस्य गत्वयशो ऽपुरस्करिष्यदोजसा तेन मागुरुद्विषा हिनीपतिः प्रतपस्यतसितेन पत्रिणा ४९ को न्विमं हरितु-
या रंगमायुधस्थयसीं दधतमंगसंहति वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम् ५० मित्रमिष्टमुपकारि संशये मेदिनी-
तिरयं तथा च ते तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतघ्नता ५१ लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्षभूभृ-
तः स्वतमं तव विरामाज्जिगीषतां मित्रलाभमनुलाभसंपदः ५२

किमतआह ५० मित्रमिति तथा च तस्यैव मम गहतन्वे सतीत्यर्थः अयं मेदि नीपतिः ते तव संशये प्राणसंकटे उपकारी अतएव इष्टं मित्रं ततः किं तत्राह तामिति तं मित्रभूतं विरोध्य सज्जनैकवसतिः भवादृशा सुजनमात्राधारा कृतघ्नता उपकारिवैरित्वं मा निरासि सन्नि रासयतां अन्यथा जगति कृतघ्नतैवास्तमियात् कृतघ्नता च ते भवेदिति भावः अस्यतेः कर्मणि माङि लुङ् ननु सर्वस्यार्थमूलत्वात् अर्थ एवास्तु किं मित्रेणेत्याशंक्य मित्रस्य सर्वाधिकत्वं गमेनाह ५१ लभ्यमिति -- लमिति युग्मं लभ्यमित्यादि जिगीषतां जेतुमिच्छतां जायते अनंतानुबन्धप्रत्ययः दुर्लभाः कृच्छ्रेणापि लब्धुमशक्याः असुरक्षभूभृतः रक्षितुमशक्यमहिमा नः तथापि नित्यं रक्षणीया एकसुकृतेन लभ्या इति भावः अन्ते विरसा या सा अनागत्वर्थः त्यर्थः लभ्यं तद्इति लाभाः अर्थानां संपदः एकसुकृतेन एकोपकारेण लभ्यं सुलभं न तु दुर्लभं रक्षिता रत्नाकरस्य संतत सुभावहं नत्वंते विरहं मित्रलाभं आनुमित्र लाभाद्धीनानि कृच्छ्रा इत्यर्थः हीनद्वयमतो प्रवर्जनीय संतानयोगा द्वितीया अत्रोपमेयस्य मित्रलाभस्य लाभांतरेभ्यः आधिक्याभिधानात्तया

चंचलमिति किंचवसुधनंनितांतंचंचलंमेदिनीमप्युन्नताः प्रबलाः अरातयोहरंतिमित्रंतुनायेन्याह भूधरवत् स्थिरंउपमेयंमन्विष्यगंतव्यमप्यागतेस्वतः प्राप्तंतवापिमहीपतिं सर्वधुरीणमित्यर्थः
सुहृदंमित्रंमावमंस्तमावज्ञासीरथवानितिशेषः उत्तरश्लोकगतोभवच्छब्दोविभक्तिपरिणामेनइहसंबध्यः अन्यथामध्यमपुरुषःस्यात् मन्यतेः कर्मणिमाङिलुङ् अलंकारस्तु अतिरेक एवभूधर
स्थिरमित्युपमासंगतिः शंकरः ननुमुमुक्षोः किंमित्रसंग्रहेणेत्यत्राह ५३ जेतुमिति भवताजेतुंपार्थिवेतापस्यततपश्चर्यायांकर्मणोरमेशैरमानाभावेन कुतोमुमुक्षवः मोक्षार्थिनः आयुधा
निदधते अतोमित्रसंग्रहकार्यइतिभावः तथापिकिंभवत्यामित्रस्येत्यत्राह प्राप्यतइतिमहीभृता सहसंगतोत्वयासकलंचतपसःफलंप्राप्यते अतस्तेसख्यार्हीअसत्वाभीत्यर्थः ननुअर्कि

प॰ चंचलंवसुनितांतमुन्नतामेदिनीमपहरंत्यरातयः भूधरस्थिरमुपेयमागतंमावमंस्तसुहृदंमहीपतिम् ५३ जेतुमेवभवतातपस्यतानायुधानिदधिरे
नेमुमुक्षवः प्राप्यतेसकलंचमूपतेः संगमेनतपसःफलंत्वया ५४ वाजिभूमिरिभराजिकाननंसंतिरत्ननिचयाश्चभूमयः कांचनेनकिमिवास्य
सपत्रिणाकेवलंनसहतेविलंघनम् ५५ सावलेपमुपलिप्सतेपरैरभ्युपैतिविकृतिंरजस्यपिअर्थितस्तुनमहान्समीहतेजीवितंकिमुधनंधनायितुं

चनःकुत्रोपयुज्यतेत्यत्राह ५४ वाजीति तस्यभूपतेर्वाजिभूमिराकरः इभराजकाननंगजोत्पत्तिस्थानंभूमिभूरिरत्ननिचयाश्चसंतीतिशेषः नन्वीदृगाप्तः किमेकस्मैकांचनाकांक्षायक
कलहातेत्यत्राह अस्यभूपतेः कांचनेनसौवर्णेनपत्रिणाकिमिवनकिंचित्प्रयोजनमित्यर्थः किंतुकेवलंविलंघनंव्यतिक्रमंनसहते नापंशरंलुब्धः किंत्वधिक्षेपासहिष्णुरित्यर्थः अत्रप्र
पमार्थेसमृद्धिमद्वस्तुवर्णनादुदात्तोलंकारः लक्षणंतूक्तं नान्विष्टगस्लुब्धः किमपकारीत्यत्राह ५५ सावलेयमिति महानर्थराजस्यपिपरैःसावलेपसगर्वंउपलिप्सितेउपलब्धमिष्ट
सतिविकृतिंसत्त्वात्पर्थः विकृतिमभ्युपैतिकुप्यतीत्यर्थः अर्थितोयाचितस्तुजीवितंचधनायितुंगार्द्धितंइच्छांकर्तुमित्यर्थः कदाचिन्नसमीहते जीवितमप्यात्मनोनेच्छति किंत्वर्थिनः
प्रयच्छतीत्यर्थः धनंनुकिमुधनमात्मनएवधनायितुमितिविग्रहः अत्रतुल्यन्यायात्रमर्थःअन्ययाधनंधनमित्यनेनपौनरुक्त्यंस्यात् सुपआत्मनःक्यच असनायोदन्यधनायावुभुक्षापिपासा

किरातार्जुनीयटीकायां किरातप्रकाशे २५

तत्तदिति । तस्मात्तदीयविशिखस्यातिसर्जनात् प्रत्यर्पणात् वां युवयोः यदृच्छयागतं इति यास्य योर्नाम्नाकाविनिकामोदरः राघवप्लवगराजयोः रामसुग्रीवयोरिव यदृच्छयोपनाह
गतं गुरु महत् सख्यं नमनुरूपं स्तसंगताश्रयं अन्योन्यविषयं प्रेमसख्यमस्तु । ननु परस्परोभावात् मिथ्याभियुज्यते तत्राह ॥ ५७ नेति त्वमनृतं मिथ्याभियोक्तुमभ्यारव्यातुं इतोऽर्थग्रहणाद्विक
मेकत्वं मिथ्याभियोगो भावस्मानभिमतः नेष्यसे नेष्टोऽसि कुतस्तपस्वी मुनिस्तस्यायं मुनिशाऽयो तापश्चिमविशिखेषु आदरः आरव्यानका चिद्रित्यर्थः हि यस्मान्नो
ऽस्माकं भूभृति शैलेन्द्रे अन्येपि शराः सन्ति ये शराः वज्रिणः इन्द्रस्य पराक्रमवसूनि पराक्रमधनानि शौर्यसर्वस्वभूताइत्यर्थः वज्रग्रहणादपि अद्रिरिन्द्रेणैव भिन्नस्य तेऽन्यते अत्रशरेषु
पराक्रमधनेषु पराक्रमरूपणात् स्वकश्चन्यते अप्रतीरोपहात यो चतामित्याह ॥ ५८ मार्गणैरिति । अथ एतत्तव मार्गणैः प्रयोजनं तर्हि भूभृतो गिरेः पतिं प्रभुं भूपतिं किं मुनना यसे कि ।

तत्तदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतः । राघवप्लवगराजयोरिव प्रेमयुक्तमितरेतराश्रयं ॥ ५७ नाभियोक्तुमनृतं त्वमिष्यसे कस्तप
स्विविशिखेषु चादरः । शंति भूभृति शराहि नः परे ये पराक्रमवसूनि वज्रिणः ॥ ५८ मार्गणैरथ प्रयोजनं नाथसे किमु पतिं न भूभृतः । त्वद्विधं सुहृदमेत्य सो
र्थिनं किं न यच्छति विजित्य मेदिनीं ॥ ५९ तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितं वृथा । सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभंगवेदनाम् ॥ ६० ॥

मिति न याचसे नाथ याञ्चोपतापैश्वर्याशीःषु इति धातोर्लट् न च वयं याञ्चाभंगभयं का कार्यमित्याह त्वदिति । सोऽस्मत्स्वामीन त्वद्विधं द्विधाप्रकारो यस्य तं त्वद्विधं त्वादृशं महानुभावमित्यर्थः ।
तथार्थिनं सुहृदं मित्रं भूतं अर्थिनमेत्य लब्ध्वा मेदिनीं विजित्य न यच्छति किं दास्यति किमुत दास्यत्येव किंपुनः शरानिति भावः यदुक्तं याचकत्वमित्यादि तत्रोपपत्तिमाह ॥ ५९ तेनेति तेन कारणे
न सूरिर्विद्वान् अतएव उपकारिताधनः उपकारकत्वमात्रधनः सोऽस्मत्स्वामी याचितं याच्ञां वृथा कर्तुं नेच्छति कुतो यत् एव कारणेन सीदतां क्लिश्यतामर्थिनां प्रणयभंगवेदनां
याञ्चाभंगदुःखं स्वयमनुभवन्निव वेद वेत्ति अतो न वैफल्यं याञ्चाकार्यमित्यर्थः ननु स्वयं ग्राहिणः किं याञ्चादैन्यं तत्राह ॥ ६० शक्तिरिति अर्थपत्तिषु विषये शक्तिः सामर्थ्यं स्वयंग्रहं

स्वामनुरक्तिविना ग्रहणं कारयति यद्वा निरत्ययमपराधेपि अविकारं प्रेम कर्तृ दोषमाह इदं द्वयं शक्तिकारणद्वयं निरस्यतस्त्यजतः पुंस इति शेषः अधिकबले प्रबले प्रार्थना तद्धनजिघृक्षा विप
त्फला अनर्थफलका असक्तस्यार्थीं तस्य च सतः प्रबलधनग्रहणं साफल्यमितिमिणिग्रहणसाहसवत् अनर्थाय कल्पत इत्यर्थः अथ संसर्गसंपन्याशङ्कत्वाभिमानस्त्वामाह ६१ अस्त्रवे
दमिति इह जगति तापसेषु तपस्विनां मध्ये तत्र निर्धारणे इति सप्तमी जामदग्न्यमपहाय परशुराममेकं विनेत्यर्थः अस्त्रवेदं तत्त्वतोऽधिगम्य भुजवीर्येण शालत इति भुजवीर्यशालिनः उभयसंपन्न
न स्येत्यर्थः शालनक्रियापेक्षया समानकर्तृकत्वनिर्देशः कस्य चायुधं चरितः प्राप्तोऽर्थो येन तच्चरितार्थं सार्थकं गीयते न कस्यापीत्यर्थः अतस्तापि तापसत्वादिकिंचित्करस्यैतेन न सहस्यमेवमु
ख्यमिति भावः मनुष्य मृगं शारदो हि एणममतेन कथं ... तापसत्वादिनाशंकासंगत्याधिनावन्वगणवधापराधः क्षमिष्यत इत्याह ६२ अभ्यघानीति त्वया मुनिचापलात् ब्राह्मणचापला
शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययं कारणद्वयमिदं निरस्यतः प्रार्थनाधिकविपत्फलासतः ६१ अस्त्रवेदमधिगम्य तत्त्वतः कस्य
चेह भुजवीर्यशालिनः जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधं ६२ अभ्यघानि मुनिचापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः अक्षमि
ष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ६३ जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमुमपक्रियां आपदेत्युभयलोकदूषिणी वर्तमा नमपथे हि दुर्मतिम् ६४ ॥
ज: दित्यर्थः परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति विश्वः मृगोऽभ्यघानि अभिहतः इति यत् हन्तेः कर्मणि लुङ् तद्धननमयमस्मत्स्वामी अक्षमिष्ट क्षान्तवानेव तथा हि प्रमाद्यतां अविमृश्य कुर्वतामित्यर्थः
दोषमपराधं अज्ञता अज्ञानिता संवृणोति आच्छादयति खलु नाज्ञस्यापराधो गण्यत इत्यर्थः अथ सुहृद्भावेन हितमुपदिशति ६३ जन्मेति जन्म सत्कुलप्रसूतिः वेषा जटावल्कलादिः तपो नियमस्तेषां विरोधिनी
विरुद्धां अमुमेवंविधां अपक्रियामपकारं पुनरितः परमित्यर्थः मा कृथाः मा कुरु करोतेः कर्मणि माङि लुङ् नचोऽकृथा इत्यागमेन सकर्मकत्वं आत्मनेपदं शीघ्रत्नियमजिज्ञासा नयतेस्तत्समाधानमुक्तं वेषरी
त्ये दोषमाह आपदिति हि यस्मादपथे वर्तमानं दुर्मतिं पुरुषमिति शेषः उभौ लोकौ दूषयतीत्युभयलोकदूषणी नद्धितार्थेत्यादिना उत्तरपदसमासः आपत् इतिप्राप्नोति समासविष
य उभशब्दस्य स्थाने उभयप्रयोगस्य साधुः यदाह कैयटः उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दप्रयोगो मा भूत् उभयशब्दस्यैव यथा स्यादित्युभयपुत्र इत्यादि भवतीति
यदुक्तं मुनिचापलाद्वै तेऽस्यक्षन्तव्यमिति ६४ यदुमिति ॥ सांप्र तं त्वां प्रति इत्थं तावदिदं प्रतीदीनामधुना सांप्रतं तथेत्यर्थः पितृवत्पुमार्चयितुं नेतुमसि तथा हि वोक्तसौरवात् अर्चिचयिषुर्यपि
तु

कि का टी
थं स १३
१३

१५ भिक्षुर्नासि अतो न पित्रर्थं यं हिंसा कापि देवतार्थो न दाना परा धोवि हिता स्वादिति भावः अथ सर्वोत्तः आत्मानं गोपायेदिति अतो रात्म रक्षार्थं तिचे न्न्यायाह॰ दातुमिति अंगपदवीं दातुमेव न तु हं
तुं मुनित्वादिति भावः दमो योग्यः सन्नपि किं किमर्थं स्मे विशिखं त्वं न्यवीविशः निवेशितवान् विशतर्णि चेरतपि लुङ् अभिप्रावतो मृगा न अपराधेनैव आत्मरक्षार्थं धरद्धीत्त
ापलमेव न हिंस्यादिति निषेधादिति भावः किं बहुना परमार्थं श्रृणु तानित्याह॰ ६५ सज्जन इति सज्जनोसि अतश्चापलं चपलस्य कर्म विजिहीहि नहीते लोट् आजहातेरीकारः तथा हि सर्वदा
के भवतां कोवा न हिष्यते इव शब्दो वा कालंकारेवा शब्दोऽवधारणे असहने कारणमाह आनिम्नता अचलाः पुनः कार्य कारिणो गुरून्निशालानपि पुणो न बाधवोवारि धीनिवंदोभयं
ति उपमानुप्राणि तोऽर्थान्तरन्यासः नन्वयं लुभितः किरातः किं करिष्यतीत्याह॰ ६६ अस्त्रवेदमिति॰ अस्त्रवेद अयं महीपतिः अस्त्रवेद वित् निग्रहानुग्रह समर्थ इति भावः

१५ यत्नु मिच्छसि पितुः न्न सांप्रतं न त्वमर्जिचयिषु दिवौकसः दातुमेव पदवीमपि क्षमः किं मृगेण विशिखं न्यवीविशः ६५ सज्जनो
ऽसि विजिहीहि चापलं सर्वदा क इव वा सहिष्यते वारिधीनिव युगांत वायवः क्षोभयंत्य निभृता गुरूनपि ६६ अस्त्रवेद विदयं
महीपतिः पार्वतीय इति मावजीगणः गोपितुं भुवि मिमां मरुत्वता शैलवासमनुनीय लंभितः ६७ ६७ ६७

अतः पर्वतेभावः पार्वतीयः पर्वताच्छ इति छ प्रत्ययः मावजीगणः वनेचरं तु ग्रामावज्ञासीरित्यर्थः गणायतेमाङि लुङ् ईच्चगण इतीकारः नन्वीदृशश्चेत्किमिह वने वसतीत्यत आह
गोपितुमिति मरुत्वता देवेन्द्रेण भांभुवं गां गोपितुं रक्षितुं आयादय आर्द्धधातुके वेति विकल्पात् गुपधुपेत्यादिना आयादेशः अनुनीय प्रार्थ्य शैलवासं लंभितः
प्रापितः एयते कर्मणि इति वचनात् अणि कर्तृकर्म [illegible] णौ कः गतिबुद्ध्येत्यादिना अणिकर्तुः कर्मत्वं उपसंहरति॰ ६७ ६७ ६७ ६७ ६७

वदिति॰ तत्तस्मान्मुनिचापलचान्मुनेः संबंधीदं मृगवधात्तोमयात्तितिदितिर्तसोयमितिवचश्चभूपतिरवोचतः शरद्रोहस्यप्रत्यर्प्पणप्रतीकार इत्याह अत्रभवते
इत्यायस्वाभिन्ने अत्रभवान्व्याध्यानः निर्जवाणांप्रत्यर्प्पयितु सर्वसंपदः प्राप्नुहीशाख्येतितिभावः ननुमतातेनसख्यमेवनरोचेतेति किंपुनस्तन्मूलाः सं
पदस्तत्राह ६८ आत्मनीनमिति॰ आत्मने हितमात्मनीनं आत्मनःक्लिष्वजनभोगोत्तरपदात्खः उपतिष्ठते संगच्छते उपादेवपूजासंगतिकरणमि

त्यात्मनेपदं इतिमिदं मयानूने रित्यवोचतवचश्चमूपतिः वाणमत्रभवतेनिजं दिशन्प्राप्नुहि त्वमपि सर्वसंपदः ६८ आत्मनीनम
नुतिष्ठतेगुणाः संभवंतिविरमंतिचापदः इत्यनेकफलभाजि मास्मभूदर्थिताकार्थमिवार्य्यसंगमे ६९ इस्पतामयम
नोकहांतरेतिग्महेतिपत्तनाभिरन्वितः साहिवीचिरिवसिंधुरुद्धतोभूपतिः समयसेतुवारितः ७० ७० ७० ७०

मित्रकरणप्रथितिक्षितिवत्त्व्यादात्मनेपदं गुणाहृपः संभवंति आपदश्च विरमंति व्याङ्परिभ्योरम इतिपरस्मैपदं इत्यनेकफलभाजि आर्य्यसं
गमेसाधुसंगमे सतोऽर्थिता अपेक्षा कथमिवमास्मभूत् सर्वदाभवत्येव नचार्यंदूरेवर्त्तेतइत्याह ६९ इस्पतामिति॰ तिग्माहेतिभिस्तीक्ष्णा
युधाभिः पत्तनाभिरन्वितोभूपतिः साहयः समर्प्पयावीचयोयस्यसःसिंधुः समुद्र इवोद्धतः किंतुसमयोमर्य्यादासंयध्यतुरिवसमयसेतुः तेनवारितः

सन्हस्तेन निर्द्दिशन्नाह अयमनोकहांतरे द्रुमांतर्द्धनेवर्त्तत इति शेषः दृश्यतां अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाइत्यमरः ७० सज्यमिति· स्थेयान् स्थिरतरः प्रियस्थिरेत्यादिना स्थादेशः यश्च भूपतिः हरितुरंगमकेतोरिंद्र- जस्य लक्ष्मीं शोभां जयन् अहिपतिरिवस्थवीयः स्थूलतरं स्थूलदूरे -त्यादि सूर्वगुरोगाय णादिपरलोपो सहज्यया वर्त्तमानं सज्युं धनुर्वहति हे मतिमन् अस्य चमूपतेर्मतिमनुकूलयानुकूलां कुरुसेख्यं कुर्विंत्यर्थः

अथास्य विज्ञापनमाह८० सज्यं धनुर्वहति योऽहिपतिस्थवीयस्थेयान् जयन् हरितुरंगमकेतुलक्ष्मी अस्यानुकूलयम तिं मतिमन्ननेन सख्या सुखं त्वमपियास्यसिचिंतितानि· ७१ इति श्री त्रयोदशः सर्गः समाप्तम् शुभमस्तु पातु ।।

मतिमत्तायाः फलमेतदिति भावः कुजः सख्यः अनेन च मसपातिहेतुनासुखमक्लेशेन चिंतितानि मनोरथान् त्वमलं[भि]यास्यसि प्राप्स्यसि वसंत तिलकावृत्तम् ७१ इति श्री महोपाध्याय मल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां त्रयोदशस्सर्गः १३ शुभमस्तु सं २८ मार्गशिर ७ सुदि १ श्री श्री श्रीश्रीश्री राम श्रीश्री श्रीराम श्रीश्री श्रीराम श्रीश्रीश्री राम कृष्ण श्रीश्रीश्री रामरामाः

॥ किरातस्य द्वादशः सर्गः ॥ पत्रसंख्या ॥ ११

॥ १२ ॥

४२४१ खंडित

पत्रे १८३

॥कि॰ का॰ टी॰॥
॥ग्रं॰ द्वा॰ २२॥
॥१॥
15

ॐ श्रीगणेशायनमः ॥ अथेति ॥ अथेन्द्रतिरोधानानंतरं ॥ रुचिरवदनः ॥ इंद्रसाक्षात्कारसंतोषात् ॥ प्रसन्नमुखो धनंजयः अर्जुनः ॥ वासवस्य वचनेनोपदेशेन ॥ त्रिलोचनं क्लां
तिरहितं ॥ यथा तथा ॥ अभिराधयितुं प्रसादयितुं ॥ तपांसि विधिवत् ॥ विध्यर्हं यथा शास्त्रमित्यर्थः ॥ नदर्हं नातिवर्तत इति वतिप्रत्ययः ॥ विदधे चक्रे ॥ अस्मिन्सर्गे उद्गता नाम वृत्तम् ॥ सजसादिमे स
लघुकौ च नसजगुरुकेष्वथोद्गता ॥ त्र्यङ्घ्रिगतभजनजलगयुक्ता सजसा जगौ ॥ चरणमेकतः पठेदिति लक्षणात् ॥१॥ अभीति ॥ अभिरश्मिमालि ॥ अभिसूर्यं भुजैकचर
णो निषीदतः ॥ विमलस्य बाह्याभ्यंतरशुद्धिमतः ॥ धृतजयधृतेर्जयेच्छायेन तस्य ॥ अनाशुषः अनश्नतः ॥ उपेयिवाननाश्वाननूचानश्चेति निपातः ॥ तस्यार्जुनस्य व

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनं ॥ क्लांतिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः ॥१॥ अभिर
श्मिमालि विमलस्य धृतजयधृतेरनाशुषः ॥ तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणेन सीदतः ॥२॥ वपुरिन्द्रि
योपतपनेषु सततमसुखेषु पांडवः ॥ व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविचिंत्यवैभवम् ॥३॥ हृतं पूरणाद्बहुतिथा बहु

संख्या इत्यर्थः ॥ तस्य पूरणे डट् ॥ बहुपूगगणसंघस्य तिथुगिति तिथुगागमः ॥ तिथयो दिनानि प्रतिजग्मुः ॥ अथ तिथिशब्दः पुल्लिंगः ॥ तदाह तिथयो द्वयो रित्यभिधानात् ॥
अन्यथा बहुतिथा इत्यत्र टित्वान्ङीप्स्यात् ॥२॥ वपुरिति ॥ पांडवोऽर्जुनः ॥ सततः ॥ वपुषः ॥ इंद्रियाणां चोपतपनेषु संतापकरणेषु ॥ करणे ल्युट् ॥ असुखेषु अनशनादि दुःखेषु ॥ अनगपतिः ॥ गिरिराज इव ॥ स्थिरतां ॥ दार्ढ्यं व्याप प्राप ॥ तथाहि ॥ महतां ॥ धैर्यं ॥ अविभाव्यं ॥ दुर्बोधवैभवं सामर्थ्यं यस्य तत्तथोक्तं ॥ धीराणां मार्के चित्कारं दुःख

किरातटीका ॥ ॥
॥१३३॥

नेति ॥ तस्यार्जुनस्य मानसं सन्निहितानि यानि पक्तिसुरभीणि ॥ पाकसुगंधीनि तेषु फलेषु ॥ तथा शुचिनि स्वच्छे शिशिरे ॥ पयसि च न पपात ॥ नाकिंचिद्वांछ कांक्षेत्यर्थः ॥ आ
राधारणं तु तस्य तपसेत्याह ॥ तथा हि सुकर्मणां सुकृतिनां शोभनं तपः ॥ सुतपोऽमृतायते ॥ अमृतवदाचरति ॥ किं तपस्तृप्तानां न पानान्नैरिति भावः ॥ लोहितादिडाज्भ्यः क्य
ष् ॥ वा क्यषः इत्यात्मनेपदं ॥ लोहितादिराकृतिगणः ॥ ४ ॥ नेति ॥ सोऽर्जुनेन विस्मये अहो मया महत्तपस्तप्तमिति विस्मयं जगाम ॥ तपःस्तरति विस्मयादीति निषेधादिति भा
वः ॥ न विषसाद ॥ फलविलंबाद्ग्लान्यामाहोत्साहे न बभूव ॥ विषादश्चेतसो भंग इति लक्षणात् ॥ सदिश्रुतेरिति षत्वं ॥ मुहुः रत्नसंतानतपसि ॥ भेदेऽपि मत्वं च नागमत् ॥ किंच हतश

न पपात सन्निहितपक्तिसुरभिषु फलेषु मानसं ॥ तस्य शुचिनि शिशिरे च पयस्यमृतायते हि तपः सुकर्मणां ॥ ४ ॥ न विसिस्म
ये न विषसाद मुहुरलसतां न चाददे ॥ सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥ ५ ॥ तपसा कृशं वपुरुवा
ह स विजितजगत्त्रयोदयं ॥ त्रासजननमपि तत्त्वविदां न दुस्ति यन्न सुकरं मनस्विभिः ॥ ६ ॥

क्तिनी हतसारे ॥ अत एव पेलवे भं
गुरे ॥ हतशक्तिपेलवे ॥ रजस्तमसी गुणौ ॥ उरुधृति महासारं ॥ तस्यार्जुनस्य सत्त्वं ॥ सत्त्वगुणं न हतः स्म ॥ न हतवती ॥ हंतेर्लट् स्म इति ॥ लादिभ्र्नार्थत्वं ॥ ५ ॥ तप
सेति ॥ सोऽर्जुनस्तपसा कृशं ॥ तथापि विजिते ॥ जगत्त्रयोदयं ॥ त्रासजननमपि तत्त्वविदां यस्मादयः उत्कर्षापनेन तथोक्तं ॥ किंच तत्त्वविदामपि लोमहितार्थं तत्त्वं
जानतामपि त्रासजननं भयंकरं ॥ वपुरुवाह ॥ वहति स्म ॥ न चैतच्चित्रमित्याह ॥ किमिति ॥ यन्मनस्विभिर्न सुकरं ॥ तत्किमिवास्ति न किमपीत्यर्थः ॥ इवशब्दो वा
क्यालंकारे ॥ मनस्विनामिति पाठे विशेषे षष्ठी ॥ स्यादेवकृत्योगस्य पानलोकेत्यादिनिषे

षष्ठ ॥ ३३

न

ज्वलत इति॥ विजयी सोऽर्जुनः॥ अनुनिशीथं॥ अर्द्धरात्रे॥ विभक्त्यर्थेऽव्ययीभावः॥ अर्द्धरात्रं निशीथौ द्वौ इत्यमरः॥ ज्वलतो दीप्यमानादनलादधिकरुचिस्त-
थांभसांनिधेः धैर्य्यं गांभीर्यं तदेव गुणः॥ न मर्जयन्॥ किं च शैलतः॥ शैलादपि समुन्नततरो दृश्यते॥ अत्र रुच्यादिभिरनलाद्याधिक्यासंबंधाभिधानाद-
तिशयोक्तिरलंकारः॥ ७॥ जपत इति॥ सदा उपांशुरहोस्फुटमित्यर्थः॥ रहस्योपांशु चालिंगे इत्यमरः॥ करणवद्‌शब्द [...] मनुच्चप्रयोगः॥ उपांश्वितिकौ

ज्वलतोनलादनुनिशीथमधिकरुचिरंभसांनिधेः॥ धैर्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः॥ ७॥
जपतः सदा जपमुपांशु वदनमभितो विसारिभिः॥ तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमंडलं॥ ८॥
कवचं स बिभ्रदुपवीतपदं निहितं सज्यकार्मुकः॥ शैलपतिरिव महेंद्रधनुः परिवीतभीमगहनो विदिद्युते॥ ९॥

मा
मारल्हरां॥ जपत इति जपं मंत्रमित्यर्थः॥ जपतः पठतस्तस्यार्जुनस्य वदनं कर्तृ॥ अभितो विसारिभिर्दशनकिरणैर्हेतुभिः॥ परिवेषभीषणा-
र्कमंडलमर्कमिव शुशुभे॥ परिवेषस्तु परिधिरुपसूर्यकमंडले इत्यमरः॥ ८॥ कवचमिति॥ कवचं वर्म बिभ्रत्॥ उपवीत पदे॥ यज्ञोपवीतस्थाने
निहितं न्यस्तं कार्मुकं येन स तथोक्तः॥ सोऽर्जुनो महेंद्रधनुषा परिवीतं परिवेष्टितं भीमं गहनं यस्य स शैलपतिरिव विदिद्युते॥ ९॥ ॥रामजी॥

प्रवेशेति नियमसवनाय॥ नित्यस्नानाय॥ सवनंयजनेस्नानेसोमनिर्दलनेपिचेतिविश्वः॥ गच्छतः॥ कृशस्य॥ तस्यार्जुनस्यपदैः॥ पादन्यासैः॥ विनमितोहिमवान्॥ गांभुवं॥ प्रविवेशेत्युत्प्रेक्षा॥ ननुकृशस्यकथमियद्गौरवमित्यत्राहगुणाः॥ सारादयोगुरुतांनयंति॥ प्रापयंति॥ संहतिः॥ संघातोमूर्त्तिरितियावत्॥ ननयंति॥ अतःसारांगस्यगौरवंभवति॥ नतुवाह्यांगस्याल्पस्य॥ अत्रचहेमपिंडतूलपिंडावेवनिदर्शनमितिभावः॥२०॥ परिकीर्णमिति॥ उद्यतभुजस्योर्ध्वबाहोस्तस्यशिरसउपरि॥ षष्ठ्यंतसमासार्थं॥ असमर्थप्रत्यये॥

प्रविवेशगामिवकृशस्यनियमसवनायगच्छतः॥ तस्यपदविनमितोहिमवान्गुरुतांनयंतिहिगुणानसंहतिः॥२०॥ परि
कीर्णमुद्यतभुजस्यभुवनविवरेदुरासदं॥ ज्योतिरुपरिशिरसोविततंजगृहेनिजान्मुनिर्दिवौकसांपथः॥२१॥ रजनीषु
राजतनयस्यबहुलसमयेपिधामभिः॥ भिन्नतिमिरनिकरंनजहेशशिरश्मिसंगमयुजानभःश्रिया॥२२॥

नेतिषष्ठी॥ विततंविस्तृतंभुवनयोर्विवरे॥ द्यावापृथिव्यो॥रंतराले॥ परिकीर्णंव्याप्तं॥ दुरासदं॥ दुर्धर्षं॥ ज्योतिस्तेजोमुनीनां॥ दिवौकसश्च॥ निजान्नियतान्॥ पथोमार्गान्॥ जगृहे॥ जग्राह॥ प्रतिबंधेत्यर्थः॥२१॥ रजनीष्विति॥ बहुलसमयेकृष्णपक्षेपि॥ रजनीषु॥ राजतनयस्य॥ अर्जुनस्यधामभिस्तेजोभिर्भिन्नस्तिमिरनिराकरोयस्यतन्नभसः॥ शशिरश्मीनां॥ संगमेनहेतुनायुजा॥ संगतयाश्रियायत्श्रीतुल्ययाश्रियेत्यर्थः॥ अतएवनिदर्शनालंकारोयं॥ नजहे॥ नत्यक्तं॥

॥ कि॰ का॰ टी॰ ॥
॥ ३ ॥ स॰ ॥ १२ ॥
प३५
17

महतेति ॥ जिस्णोर्र्जुनाज्जन्मयस्यतेनजन्मांतरपरत्वात्यधिकरणोवहुव्रीहिः ॥ महतामयूषनिचयेनशमितरुचिहतप्रसभंसुमालिनोवपुरर्कबिंबंह्रीतंजित्वालज्जितमिवे त्युत्प्रेक्षा ॥ वीतमले विमले मेघनीहाराद्यावरणरहितेपीत्यर्थः ॥ नभसिनविराजतेस्म ॥ ३३ ॥ नमितिति ॥ उदीरिता उद्धता ॥ अरुणजटानामंशवोयस्यतमधिगुणं ॥ अधिज्यं ॥ शरासनंयस्यतं ॥ तमर्जुनमासुरीरसुरसंबंधिनीः ॥ पुरीमिमंथिषु ॥ मथितुमिच्छु ॥ मंथः सनंताडुः प्रत्ययः ॥ नयाव्यनुदिनं ॥ ललाटदृशंयस्यतं सांताविपुरविजयोद्यतम भालाक्षंरुद्रमिवददृशुः ॥ अत्रभालाक्षस्यरुद्रस्यासंभवात् ॥ तत्तः सिद्धोपमानासिद्धेनैयमुपमाकिंतुउत्प्रेक्षा ॥ सावाभालाक्षमित्युपमानदुपमेयस्यतन्नकथनार्थे ऽ

महतामयूषनिचयेनशमितरुचिजिस्णुजन्मना ॥ ह्रीतमिवनभसिवीतमलेनविराजतेस्मवपुरंशुमालिनः ॥ ३३ ॥ नमुदीरि तारुणजटांशुमधिगुणशरासनंजना ॥ रुद्रमनुदितललाटदृशंददृशुर्मिमंथिषुमिवासुरीःपुरः ॥ ३४ ॥ मरुतांपतिःस्विदहिमां शुरुतपृथुशिखःशिखीतपः ॥ तप्तुमसुकरमुपक्रमतेनजनोप्ययमित्यवयथेसतापसैः ॥ ३५ ॥

न्वयव्यतिरेकेणजीवितेत्यनयोरं[illegible]

गांगिभावेनशंकरः ॥ उपमानुव्यंजनस्त्वलंकारेणालंकारध्वनिः ॥ ३४ ॥ मरुतामिति ॥ मरुतांपतिः ॥ स्विदंनदेवेंद्रोवा ॥ अहिमांशुः स्विनसूर्योवापृथुशिखोम हाज्वालः ॥ शिखीस्वित ॥ पावकोवा ॥ असुकरं दुःकरंतपस्तप्तुमुपक्रमते ॥ अयंपुरुषः ॥ जनः ॥ कश्चिन्नप्राकृतोनेति ॥ सोर्जुनस्तापसैस्तपस्विभिः ॥ अवयये ॥ तिमन्वर्थेयोरप्रत्ययः ॥ अवयवे ॥ अवगतः ॥ पानेरवपूर्वात्कर्मणिलिट् ॥ अत्रेंद्रत्वादिकर्मारोप्यजनत्वापवादात्साम्ययोगेत्यापहृवालंकारः ॥ सामान्यलक्षणं ॥ ॥ २३५ ॥

नेति ॥ दूरगं व्यापकमित्यर्थः ॥ हरिननयस्य धाम तेजो भूरुहवनानि न ददाह ॥ आग्निवदिति भावः ॥ तथाप्यपः ॥ परिशोषं न नयति स्म ॥ अर्कवदिति भावः ॥ तथापीति शेषः ॥ सि
द्धाश्रतापसाश्रितैः ॥ सुसहं च न बभूव ॥ अतो अस्य अलौकिकं तेज इति भावः ॥ अत एव दुःसहत्वं ॥ दाहशोषणकर्त्रयोर्विरोधाभासोऽलंकारः ॥ आभासत्वे विरोधस्याविरोधालंकृति
मनेतिलक्षणात् ॥ २६ ॥ विनयमिति ॥ अथानंतरं ॥ अशरणमहर्षयः ॥ विनयं शिक्षां गुरुणा ॥ औरसादाद्यपइव ॥ आशिक्षितत्तसनत्द्वादिति भावः ॥ नीतिः षाड्गुण्यप्रयोगः ॥ नीयते

न ददाह भूरुहवनानि हरितनयधाम दूरगं ॥ न स्म नयति परिशोषमपः सुसहं बभूव च सिद्धतापसैः ॥ २६ ॥ विनयं गुरुभ्य इव विवेकमप
नयभिरं नयाइव ॥ न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ २७ ॥ परिवीतमंशुभिरुदस्तदिनकर मयूखमंडलैः शं
भुमुपहतदृशः सहसा न च ते निरीक्षितुमभिप्रसेहिरे ॥ २८ ॥

नेनेतिन्यायः नियामकप्रमाणं तमवधय समया इव अप्रामाणि
कस्य समयोल्लंघित्वादिति भावः ॥ शिवं ॥ शरणं ॥ रक्षितारं ॥ शरणं गृहरक्षित्रोरित्यमरः ॥ ययुः शरणत्वेन प्रापुरित्यर्थः ॥ अशरणा शरणमिति चोपमास्वपि यथायो
ग्यं योज्यं उपमालंकारोऽयं ॥ २७ ॥ परिवीतमिति ॥ उदस्तं दिनकरमयूखमंडलं यैस्तैः सूर्यतेजोविजयिभिरित्यर्थः ॥ अंशुभिस्तेजोभिः ॥ परिवीतं शंभुं उपहतदृशः
प्रतिहतदृष्टयस्ते महर्षयः ॥ सहसा झटिति निवारयितुं ॥ निशामयितुं द्रष्टुमित्यर्थः ॥ दृष्टप्रज्ञानिशामनयोरिति शाकटायनादिनात्तुमुन् ॥ नाभिः प्रसेहिरे ॥ न च शे
कुः ॥ २८ ॥ अथेति ॥ अथ दृष्टुपघातानंतरं भूतभव्यभवतां ॥ भूतभव्यभवतां ॥ भूतभविष्यवर्त्तमानानामीशं देवमभिमुखयितुं ॥ अस्याभिमुखीकर्तुं ॥ केनत्स्त

॥कि॰॥का॥टी॥
॥टं॰॥स॰॥१२॥
॥४॥

18

वाःकृतस्तोत्राःसंतः॥ननुअन्ययेतिभावःस्तवःस्तोत्रंनुतिर्नुतिरित्यमरः॥तत्रमहसि॥तेजसिकमनीयविग्रहंरम्यमूर्त्तिमयुग्मानित्रीणिलोचनानियस्यतंपुरुषंददृशुः॥१९॥

अथपंचभिःपुरुषंविशिनष्टि॥ककुदइति॥स्थितमिति॥२१॥अनुजान्विति॥२२॥परिणाहिनेति॥२३॥भुतेति॥२४॥आदिकुलकं॥ककुदइति॥कीदृशंपुरुषं॥अकृशेनम

हतापरिणाहेनविशालेनतयाशालतइतितथोक्ते॥परिणाहोविशालतेत्यमरः॥वृषस्यवृषभस्यककुदेअंससकूटे॥आश्रयीकृतइतिशेषः॥आर्द्रचंदने॥उमायाःकुच

युग्ममंडलइवकृतवाहुंन्यस्तहस्तं॥अतएवस्पर्शसुखमनुभवंतं॥ककुदस्ततथाविधस्पर्शसुखत्वादितिभावः॥उपमालंकारः॥२०॥स्थितमिति॥उन्नतेतुहिनशै

अथभूतभव्यभवदीशमभिमुखयितुंकृतस्तवाः॥तत्रमहसिददृशुःपुरुषंकमनीयविग्रहमयुग्मलोचनं॥१९॥ककुदे

वृषस्यकृतवाहुमकृशपरिणाहशालिनि॥स्पर्शसुखमनुभवंतमुमाकुचयुगमंडलइवार्द्रचंदने॥२०॥स्थितमुन्नतेतुहि

नशैलशिरसिभुवनातिवर्तिना॥सादिजलधिजलवाहपथंसदिगंतरमिवविभुमोजसा॥२१॥

लशिरसि॥हिमवतःशिखरेस्थितं॥कचित्कोणेस्थितमित्यर्थः॥तथापिभुवनातिवर्तिना॥सर्वलोकातिशायिना॥ओजसा॥अद्रिभिः॥जलधिभिः

जलवाहपथेनाकोशेनचसहवर्त्ततइतितथोक्तं॥दिग्भिःसहवर्त्ततइतिसदिक्॥उभयत्रापितेनसहेतितुल्ययोगइतिबहुव्रीहिः॥विभ्वमभ्नुवानं

[illegible]॥आप्नुवंतमिवस्थितमित्युत्प्रेक्षा॥अश्मूङ्व्याप्तावितिधातोःशानच्॥ ॥२१॥ राम॥

१२४

अनुजान्विति ॥ जानुनोर्मध्ये ॥ अनुजानमध्यं ॥ विभक्त्यर्थेऽव्ययीभावः ॥ अयसक्तं लग्नं ॥ वितत्यापतं च वपुर्यस्य तेन महाहिना ॥ अवसक्तकावंधभूतेनेत्यर्थः ॥ अभिवेष्टित
मत एव ॥ रवितेजसामवधिना ॥ पर्यन्तभूतेन महीभृता ॥ लोकालोकाचलेनाभिवेष्टितमखिलं लोकमिवस्थितामित्युपमा ॥ अस्य पूर्वपश्चापरभागे लोकाचलस्य
त्यागमः ॥२२॥ परिणेति ॥ पुनश्च अनुहिनराशिविशदमुपवीतसूत्रतां ~~नीतमुरगमनुरंजयता शितिनामगले~~ ॥ हिमशदं शुभ्रं ॥ उपवीतसूत्रतां ॥ यज्ञोपवीतत्वं नीतं प्रापि

अनुजानुमध्यमसक्तवितमवपुषामहाहिना ॥ लोकमखिलमिवभूमिभृतां रवितेजसामवधिनाभिवेष्टितं ॥२२॥

परिणाहिनातुहिनराशिविशदमुपवीतसूत्रतां ॥ नीतमुरगमनुरंजयताशितिनागलेनविलसन्मरीचिना ॥२३॥

स्रुतमालतीसितकपालकुमुदमुपरुद्धमूर्द्धजं ॥ शेषमिवसुरसरित्पयसांशिरसाविकाशिधामविभ्रतम् ॥२४॥

तं उरगं शेषाहिमनुरंजयता स्वगुणेनोपरक्तं कुर्वता श्यामिकुर्वतेत्यर्थः ॥ परिणाहिना विशालेन विलसन्मरीचिना शितिना नीलेन कंठेनोपलक्षितं ॥ कं
ठो गलो ग्रीवायामित्यमरः ॥ अत्रोरगस्य स्वर्थवेन्निमन्त्यागेनान्यजन्यनीलीग्रहणात्तद्गुणालंकारः ॥ स्वगुणत्यागादन्योत्कृष्टगुणाहृतिलक्षणात् ॥२३॥
स्रुतेनेति ॥ पुनश्च ॥ मालतीजातिकुसुमं ॥ सुमना मालती जातिः ॥ पुष्पजातिप्रभेदयः ॥ स्त्रीलिंगा ॥ ब्रीहयः फले इति चामरः ॥ तद्वत्सितं यत्कपालमेव कुमुदं तेन

स्तुनमाश्रुतंयेनसस्तंतपोक्तं॥अवरुद्धमूर्द्ध आप्नाशिरोरुहो॥अतएवसुरसरित्पयसांशेषमिवनिर्यातद्दृष्टिं गांगमंभश्चावस्थितमित्यर्थः॥उत्प्रेक्षालंकारः॥विस्ता
रिविस्तृत्वरं शशिधामशिरसाविभ्रतं पुरुषंददृशुरिति पूर्वेणसंबंधः॥२४॥अस्यश्लोकस्यटीकानलिपितान्यपुस्तकेदृष्टत्वं॥ ५॥कुलकं॥मुनयेति॥ततो
दर्शनानंतरं॥मुनयोऽभिमुखमेत्य॥नयनविनिवेशेन॥नेत्रसंज्ञयाचोदिताः प्रेरिताः संतः॥पांडुतनयस्य अर्जुनस्यतपसाजनितं॥तत्सर्वोक्तं॥जगताम

वहुभिश्चवाहुभिरहीनभुजगवलयैर्विराजितं॥चंदनतरुभिरिवालघुभिर्धवलायितैर्मलयमेदनीभृतं॥२५॥
मुनयस्ततोभिमुखमेत्यनयनविनिवेशचोदिताः॥पांडुतनयतपसाजनितंजगतामशर्मभृशमाचचक्षिरे॥२६॥
नरसैवकोपिभुवनैकपुरुषपुरुषस्तपस्यतिः॥ज्योतिरमलवपुषोपिरवेरभिभूयवृत्रइवभीमविग्रहः॥२७॥

शर्मसुखंदुःखमित्यर्थः॥शर्मशातसुखानिचेत्यमरः॥भृशंसम्यगाचचक्षिरे॥२६॥नरसेति॥हेभुवनैकपुरुष॥वृत्रो॥वृत्रासुर॥इवभीमवि
ग्रहः॥कोप्यविज्ञानइत्यर्थः॥पुरुषस्तरसावलात्काराणेव नरसीवलरंहसीतिविश्वः॥अमलवपुषः॥ऊर्जस्वलमूर्त्तेरवेरपिज्योतिर ॥१२७॥
॥भिभूयतपस्यति॥तपश्चरति॥कर्मरोमारोमंथतपोभ्यांवर्त्तिचरोरितिकयङ्॥२७॥

स इति ॥ सधनुर्महेषुधि विभर्त्ति कवचमसिमुत्तमं जटाः वल्कलमजिनमति चित्रमिदं ॥ किंच स पुरुषो ॥ महांतौ विषुधी यस्य तन्महेषुधी धनुः ॥ कवचं ॥ वर्म ॥ उत्त
ममसिं खड्गं जटाः ॥ वल्कं चीरमजिनं चर्म बिभर्त्ति ॥ इत्येवं रूपमिदं ॥ विरुद्धवेषधारणं मुनिनानाविरोधि तथाप्यस्य न राजत इति ॥ न किंतु राजत एवेत्यर्थः ॥ किमा
श्चर्यसंभाव्यनिषेधनिवर्त्तनेहौ निषेधाविति वामनः ॥२७॥ चलन इति ॥ किंच ॥ तस्य पुंसश्चलनेऽप्यनिश्चलता ॥ तथाकरणानियमे ॥ समाधीर्थिंद्रियनि

सधनुर्महेषुधी बिभर्त्ति कवचमसिमुत्तमं जटाः ॥ वल्कलमजिनमति चित्रमिदं मुनिनाविरोधि न च नास्य राज
ते ॥२८॥ चलनेवतिश्चलतितस्य करणानियमेत्यदिग्मुखं ॥ स्तंभमनुभवति शांतमरुद्ग्रहताबकागणयुतं नभस्तलं ॥२९॥

रोधे सति ॥ करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः ॥ शांतैस्तिमितैर्मरुतां वायूनां ग्रहाणां सूर्यादीनां ताराकाराणां नक्षत्राणां च गणैर्युतं नभ
स्तलं ॥ सदिग्मुखं ॥ दिग्मुखसहितं स्तंभं निश्चलतामनुभवति भजतीत्यर्थः ॥ अनेनाविश्वातिशायिन्यस्य शक्तिरुपलभ्यत इति भावः ॥ न चैतदुपेक्ष्य
मित्याशयेनाह ॥२९॥ स इति ॥ स पुमानोजसा विजितसारं निरस्तसत्वं ॥ अमरादिनिजोपसहितं ॥ सुरासुरोपसहितं ॥ नादिदं ॥ विश्वं पुरा ॥ अपिद
धाति ॥ अपिधास्यतीत्यर्थः ॥ शीघ्रमवहरिष्यतीत्यर्थः ॥ निकटागामिके पुरेत्यमरः ॥ यावत्पुरानिपातयोर्लट् ॥ तथा हि यत्न वसुतपसा

॥ कि॰ ॥ का॰ ॥ टी॰ ॥

॥ ग्रं॰ ॥ स॰ ॥ १२ ॥

॥ ६ ॥

२०

मदुष्करं नास्ति किमिवास्ति ॥ न किंचित्तेन दुष्करमस्तीत्यर्थः ॥ सामान्येन विशेषसमर्थनरूपोर्थान्तरन्यासः ॥ ३० ॥ न चैतदल्पफलकं कंपनमित्याह ॥ विजिगी
षत इति ॥ स पुरुषो जगंति युगपद्विजिगीषते यदि विजेतुमिच्छति ॥ पूर्ववत्सन इत्यात्मनेपदं ॥ अथ युगपत्संजिहीर्षति संहर्तुमिच्छति वा ॥ अभवमपवर्गं
प्राप्तुमभिवांछति वा न विपर्यय इति शेषः ॥ किं तु मयमपस्य रुच ॥ तेजांसि ॥ विषहितुं सोढुं ॥ जीवसहलुभरुषरिष इति विकल्पादिडागमः ॥ नो क्षमाः ॥

सत्त्वदोजसाविजितसारसमरद्दितिजोपसंहितं ॥ विश्वमपिद्यातिपुराकिमिवास्तितेनवयन्नदुष्करम् ॥ ३० ॥
विजिगीषतेयदिजगंतियुगपद्यसंजिहीर्षति ॥ प्राप्तुमभवमभिवांछतिववयमस्यनोविषहितुंक्षमारुषः ॥ ३१ ॥
किमुपेक्षसेकथयनाथनतवविदितंनकिंचन ॥ त्रातुमलमभयदार्हसिनस्त्वयिमास्मशासतिभवत्पराभवः ॥ ३२ ॥

न समर्थाः ॥ केचिदत्र रुचः ॥ कामिनानि विषहितुं अवधारयितुं मा वहते ॥ न त्रसहेरवधारवधारणार्थत्वं विचार्यं ॥ ३१ ॥ किमिति ॥ हे नाथ ॥
किमर्थमुपेक्षसे कथय त्वमिति शेषः ॥ न व न विदितं ॥ त्वया ॥ अज्ञायमानमित्यर्थः ॥ क्तस्य वर्तमाने षष्ठी ॥ किंचन न किमपि न ॥ अभयदनोऽस्मा
न् ॥ अलं ॥ त्रातुमर्हसि ॥ त्वयि शासति सति ॥ पराभवो मास्म भवत् माभूत् ॥ स्मोत्तरे लङ्‌ चेति लङ्‌ ॥ न माङ्‌योगे इत्यडागमः प्रतिषेधः ॥ ३२ ॥ ॥ १३९ ॥

इतीति ॥ इतीत्थं गां वाचं विधायाभिधायेत्यर्थः । सामान्यस्य विशेषपर्य्यवसानात् । मुनिषु विरतेषु तूष्णींभूतेषु सत्सु अंधकांतकः शिवः भिन्नस्योद्वेलस्य जल
धेर्जलस्य नादवत् ॥ गुरु गंभीरं यथा तथा दिशां विवरं मंडलं ध्वनयत् । वचनमाददे ॥ वाचकार ॥ उवाचेत्यर्थः ॥ ३३ ॥ वदरीति ॥ वदरीतपोवने ॥ वदरीकाश्र
मे निवासनिरतं ॥ नित्यनिवासिनं गां भुवमवतीर्णं जयतां निधने रूपिसंहारे धातुस्तपःकर्त्तारित्यर्थः ॥ नान्नितिद्यानेत्यनन्त्यत्ययः ॥ अतएव नलो

इति गां विधाय विरतेषु मुनिषु वचनं समाददे ॥ भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरमंधकांतकः ॥ ३३ ॥
वदरीतपोवननिवासनिरतमवयात मान्यथा ॥ धातुरुदयनिधने जगतां नरसंशमादिपुरुषस्य गां गतम् ॥ ३४ ॥
द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः ॥ क्रांतकुलिशकरवीर्यबलान्मदुपासनैर्विहितवान्महत्त

केत्यादिना कर्मणि षष्ठीप्रतिषेधः ॥ आदिपुरुषस्य विष्णोरंशभूतं नरं नरसंज्ञकमित्यर्थः ॥ योनारायणः स एव इति भावः ॥ अन्यथा उक्तैवैपरी
त्येन मामवगात मानुषं माजानातीत्यर्थः ॥ हरणेलुङीति गादेशः ॥ ३४ ॥ द्विषत इति ॥ एष नरः सकलभुवनान्यभितापयतीति ॥ अभीतापणमितिनियाक्का
न्तं ॥ बहुसभीतापमितिणिनिः ॥ क्रांते आक्रांते कुलिशकरस्येंद्रस्य वीर्यबलेशक्तिसैन्ये यस्मात्तान् द्विषतः शत्रून् ॥ पराशिषु ॥ परासितमिच्छुः ॥ अस्यतेः स

॥ कि॰ ॥ का॰ ॥ टी॰ ॥
॥ ग्रं ॥ स॰ ॥ १२ ॥
॥ ७ ॥
91

न्नंनाद्दुः अन्वयः ॥ मदुपासनं मदाराधनं ॥ करिष्योत्सुकः ॥ महत्तपो विहितवान् ॥ अत्र निमित्तं शत्रुघातैव ॥ ३५ ॥ अथास्यमानुषावतारे कारणमाह ॥ अयमिति
विभुः प्रभुः ॥ अयं नरः ॥ अच्युतः ॥ कस्मश्च ॥ सरसिरुहजन्मनो ब्रह्मणो वचनेन प्रार्थनया ॥ असुराणां निधनेन क्षरणेन ॥ प्रजाः पातुं ॥ भुवमभ्युपेत्य मनुजे
षु तिष्ठतः ॥ वस्तुतस्तु साक्षान्नरनारायणावतारौ ॥ कृष्णार्जुनाविति भावः ॥ ३६ ॥ अथास्य सत्वसंपदं प्रकाशयितुमाह ॥ सुकृति ॥ मूकदानवो दारवः ॥

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः ॥ पातुमसुरनिधनेन विभुर्भुवनमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३६ ॥
सुकृत्यमेतदवगम्य निपुणमिति मूकदानवः ॥ हन्तुमभिपतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥ ३७ ॥
विवरेऽपि नैनमनिरूढमभिभवितुमेष पारयन् ॥ पापनिरतिरविशङ्कितया विजयं व्यवस्यति वराहमायया ॥ ३८ ॥

कश्चिदसुरः ॥ एतत्पांडवकृत्यं ॥ सुकृत्यमिति ॥ निपुणमवगम्य साधु निश्चित्य पांडवसुतमर्जुनं हंतुं अभिपतति ॥ तत्तस्मात्कारणादत्रार्जुनाश्रमे
विषये ॥ आश्रमं प्रतीत्यर्थः ॥ मया सह त्वरया गम्यतां ॥ द्रष्टुमिति शेषः ॥ ३७ ॥ विवरेति ॥ पापनिरतिर्यस्य स एकदानवो विवरे रंध्रेऽपि ॥ एकांतेऽपीत्य
र्थः ॥ एनं पांडवं ॥ अनिरूढं ॥ प्रकटमभिभवितुं न पारयन् ॥ नशक्नुवन् ॥ विभाषया त्रितिनञ्समासः ॥ अविशंकितया ॥ स्वरूपगूहनान्निःशंकि

गृह

१३९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ततः किमित्याह । निहते मयि । विडंबितमनुकृतं । किरातनृपतिवपुर्येन एवंविधेन मया निहते रिपौ वराहे मुक्तनिशितविशिखः सन् । अयं पांडवः । प्रसभं प्रसह्य मृ
गयाविवादं मृगप्रहारकलहमाचरिष्यति करिष्यति । मयाहतमेव मृगं ग्रहितास्त्वयमहमेव प्रवर्त्तेनेति कलहयिष्यन इत्यर्थः । २९ । ततोपि किंभावीत्यत्राह ।
तपसेति । तपसा नितरां पीडितः । अत एव कृशस्तस्य निपीडितकृशस्य । पूर्वकालेत्यादिना समासः । तथा विरहिता । सहायसंपत् यस्य तस्यैकाकिनः । मृधे ।

निहते विडंबितकिरातनृपतिवपुषा रिपौ मया । मुक्तनिशितविशिख प्रसभं मृगयाविवादमयमाचरिष्यति ॥२९॥
तपसा निपीडितकृशस्य विरहितसहायसंपदः । सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधेभिकुप्यतः ॥३०॥

रणे मृधमास्कंधनं संख्यमित्यमरः । अधिकुप्यतोऽधिकं कुप्यतोस्य पांडवस्य सत्त्वविहितं स्वभावकृतं । स्वाभाविकमित्यर्थः । सत्त्वोऽस्त्री
जंतुक्लीबेमवसाये पराक्रमे । आत्माभावे पिशाचादौ द्रव्ये सत्तास्वभावयोः । आरोग्ये बलेंतःकरणे इति वैजयंती । अतुलं भुजयोर्बलं पश्यत
सैन्यमिति शेषस्त्वतः ॥३०॥ अथ त्रिभिरस्य किरातनाथाभावं वर्णयति । इतीति ॥३१॥ यदुनेति ॥३२॥ महदिति । इतीति । शिवस्तान् । मुनीन् । उदारं यु
क्तियुक्तमनुनीय रुचिरः । किरातपृतनापतिः । सवृन इत्यन्वयः । किरातसेनापतिः । वेषधारी वेभववेत्यर्थः । कथंभूतः । विषमा विकृतेनित्यासाः ।

22

हरिचंदनालयोरेवायसिंतेनवर्मेणस्वेदेनजनिताः पुलकायस्मिन्॥ घर्मः स्पाष्टातपेग्रीष्मउष्मस्वेदांभसोरपीतिविश्वः॥ लसंतेगजमौक्तिकानां
गजकुंभोद्भवमौक्तिकानामावलयएवगुणाः स्त्राणियस्मिन् तेनवत्सोपलक्षितः॥ कारिरंगामुक्तायोनित्वमाहागस्त्यः॥ जीमूतकारिमत्स्या
हवंशशंखवराहजाः॥ शुक्त्युद्भवाश्चविज्ञेयाअष्टौमौक्तिकयोनयः॥ इति॥ वदनेति॥ पुष्पैर्लतांतैर्लताग्रैर्नियमिता संयता॥ विलंबिनश्चमौल

इतितानुदारमनुनीयविषमहरिचंदनालिना॥ घर्मजनितपुलकेनलसद्गजमौक्तिकावलिगुणेनवत्सा॥ ४१॥
वदनेनपुष्पितलतांतनियमितविलंबिमौलिना॥ बिभ्रदरुणनयनेनरुचंशिखिपिछलांछितकपोलभित्ति
ना॥ ४२॥ बृहदुद्वहन्जलदनादिधनुरुपहितैकमार्गणं॥ मेघनिचयइवसंवृतरुचिरः किरातपृतनापतिः शिवः॥

यः केशवगयस्पतेनारुणनयनेनारक्तनेत्रेणाव शिखिपिछेनमयूरकलापेनलांछिताश्चिह्निताः॥ कपोलभित्तिर्यस्यतेनवदनेनरुचं॥
शोभांविभ्रत्॥ ४२॥ बृहदिति॥ पुनश्चजलदइवनदतीतिजलदनादिपि॥ कर्तर्युपमानइतिणिनिः॥ उपहितैकमार्गणं॥ संहितैकवा
णं॥ धनुरुद्वहन्॥ अतएवमेघनिचयइव॥ नदतीति जलदनादि कर्तर्युपमानइतिणिनिः उपहितैकमार्गणं संहितैकबाणं॥ स्थित

अनुकूलामिति॥ अस्याशिवस्यानुकूलं विचिंत्यप्रियमिति तानी ऋतवा॥ स्यातविग्रहैर्गृहीतकिरातदेहैः॥ नयाम्लूलानि॥ परशव॥ कुठाराः॥ शराश्च चापानि च भृतानि येः
स्तैः॥ प्रहरणार्थेभ्यः परेनिष्ठाः सप्तम्यौ इति निष्ठायाः परनिपातः॥ गणपतिभिः॥ प्रमथमुख्यैः॥ महतीं वनेचरचमूं विनिर्ममे॥ विनिर्मिता॥ माङ्‌ कर्मणि लिट्॥ ४४॥
विरचय्येति॥ अथेश्वराज्ञया॥ अनुगिरं॥ गिरेः॥ विभक्त्यर्थेऽव्ययीभावः॥ गिरेश्च सेनकस्येति समासान्तः॥ काननविभागं विरचय्य॥ अस्यायेमिति देशविभा

अनुकूलमस्य च विचिंत्य गणपतिभिरात्तविग्रहैः॥ शूलपरशुशरचापभृतैर्महतीं वनेचरचमूं विनिर्ममे॥ ४४॥ वि
रचय्य काननविभागमनुगिरमथेश्वराज्ञया॥ भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे॥ ४५॥
क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः॥ पूर्णपृथुवनगुहाविवरः सहसाभयादिव ररास भूधरः॥ ४६॥

गं कृत्वेत्यर्थः॥ भीमैर्निनादैः कलकलैः॥ पिहिता उरवो भुवो यैस्ते तथोक्ताः॥ संतः॥ मृगयामपदिश्य॥ व्याजीकृत्य॥ परितः प्रतस्थिरे॥ ४५॥ क्षुभिते
ति॥ क्षुभिताश्चलिताः॥ अभिनिःसृता॥ स्वस्थानान्निःसृता विभिन्ना॥ मुक्तसंघाताश्च ये॥ शकुनयो॥ मृगाः च तेषां यूथानि तेषां निःस्वनैः॥
पूर्णानि पृथूनि वनानि॥ गुहाविवराणि च यस्य स भूधरः॥ सहसा भयादिव॥ इत्युत्प्रेक्षा॥ ररास॥ चुक्रोध शा॥ ४६॥ ॥रामजी॥ ॥

॥कि॥टी॥का॥

॥वं॥स॥१२॥

॥९॥

23

नेयेति॥ पथि पलायनमार्गे। विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां॥ विहंगानां काकोलूकादीनां च संहतिः॥ रुषं परस्परक्रोधं नेयाय
किंतु सहैव चचारेत्यर्थः॥ तथाहि भूरिः प्रभूता भियासु ताः सममं साधारणेपन॥ आगता॥ आपदः॥ सहजमपि वैरं॥ सपदि॥ घ्नंति॥ नहि संपात्तव्यसनेषु प्रजाय
ते॥ वैरानुबंधेष्विति भावः॥४७॥ चमरीति॥ वंशविततिषु॥ वेणुगुल्मेषु॥ विषक्ताः॥ भृशं प्रियवालाः॥ प्रियरोमाणः॥ वालधयः॥ पुच्छानि येषां तैः ग

न विरोधिनी रुषमियाय पथि मृगविहंगसंहतिः॥ घ्नंति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः॥४७॥
चमरीगणैर्गणबलस्य बलवति भयेप्युपस्थिते॥ वंशविततिषु विषक्तपृथुप्रियवालवालधिभिरादधे धृतिः॥४८॥
हरसैनिकाः प्रतिभयेपि गजमदसुगंधिकेसरैः॥ स्वस्थमपि ददृशिरे सहसा प्रतिबोधजृंभितमुखैर्मृगाधिपैः॥४९॥

पुच्छोऽस्त्री लोमलांगूले वालहस्तश्च वालधिरित्यमरः॥ चमरीगणैः॥ शिवबलस्य॥ संबंधिनि न तु कर्तृत्वमित्यर्थः॥ संबंधमात्रविवक्षायां षष्ठी
अन्यथा भीत्रार्थानां भयहेतुरिति पंचमी स्यात्॥ बलवति सबले भये॥ उपस्थिते प्राप्तेपि धृतिराददे॥ स्वीकृता वालछेदभयात् प्राणहानिमप्य
वगणय्यास्थितामित्यर्थः॥४८॥ हरेति॥ भयंकरं प्रतिभयमित्यमरः॥ प्राप्तेपीति शेषः॥ गजमदैः॥ सुगंधयः॥ सुरभयः केशरा येषां तैः॥ हत्वानेकगजैरि १५१

त्यर्थः ॥ सहसा ॥ सेनाकलकलश्रवणानंतरमेव प्रतिबोधेन ॥ निद्रापगमेन ॥ जृंभितानि व्याकोशितानि मुखानि येषां तैर्मृगाधिपैः ॥ स्वस्थं निःशंकमेव ॥ हरसैनिका ॥ अ
भिदद्रिशिरे ॥ इहिताः ॥ ननु किंचित्सुभितमित्यर्थः ॥ युक्तं चैतद्राजनामधारिणामिति भावः ॥ ४९ ॥ विभ्रामिति ॥ अपह्नुतजठरैः ॥ शफरीकुलाकुलाः पंकविषमिततटाः ॥
स्त्वकालतोभात्सुद्धिनोदरैः ॥ शफरीकुलैराकुलाः ॥ पंकैः विषमितानि दुर्गमीकृतानि ॥ तटानि कूलानि यासां ताः सरितः ॥ करिभिः ॥ पलायमानैरिति शेषः ॥ रुग्णा
नां मार्गरोधितया भग्नानां ॥ आर्द्रत्वक्षतिनिःसृतानां ॥ चंदनानां रसैः ॥ अरुणं करिरुग्णचंदनरसारुणं ॥ पयो विभ्रां बभूव ॥ बभुः ॥ भीह्रीभृहुवां श्लुवच्चेति ति

विभ्रां बभूवुरपह्नुतजठरैः शफरीकुलाकुलाः ॥ पंकविषमिततटाः सरितः करिरुग्णचंदनरसारुणं पयः ॥ ५० ॥
महिषक्षतागुरुतमालनलदसुरभिः सदागतिः ॥ व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमं ॥ ५१ ॥

कल्पादाम्नत्ययः कृञ्चानुप्रयुज्यते लिटीति भुवोऽनुप्रयोगश्च ॥ ५० ॥ महिषेति ॥ महिषैः क्षतानि वदारितानि तैः अगरुभिस्तमालैर्नलदैः
उशीरैश्च सुरभिर्व्यस्तानि विक्षिप्तानि शुकनिभानि शुकसवर्णानि शिलाकुसुमानि शैलेयाख्यानि ओषधिविशेषा येन सः अतः
शीतल इत्यर्थः कालानुसार्यं वृद्धाश्मपुष्पशीतशिवानि तु शैलेयमित्यमरः शुकनिभेति स्वरूपकथनं सदागतिर्वायुर्वनसदां वनेचरा

॥कि॰॥का॰॥टी॥
॥ग्रं॥ स॰॥१३॥
॥९॥
९५

मथितेति॥ सत्त्वसंप्लवः प्राणिनां क्षोभो निदाघो ग्रीष्म इव सरसीः सरांसि कासारः सरसी सर इत्यमरः मथितांभसः संक्षोभितोदकाः रयेण पलायन
वेगेन विकीर्णा यथा तथा मृदिता निष्पीडिताः कदल्यो गवेधुकास्तृणधान्यविशेषाश्च यासां ता लक्ष्योक्ताः तृणधान्यानि नीवाराः स्त्री गवेधुका
इत्यमरः मृदितेति इति कित्त्वान्निर्गुणप्रतिषेधः क्लान्ता जलरुहलता यासु ता एवंभूता विदधे ॥५२॥ इतीति॥ इतीत्यमुमापतिः अचल

मथितांभसो रयविकीर्णमृदितकदलीगवेधुकाः क्लान्तजलरुहलताः सरसीर्विदधे निदाघ इव सत्त्वसं
प्लवः ५२ इति चालयन्नचलसानुवनगहनजानुमापतिः प्राप मुदितहारिणीदशनक्षतवीरुधं वस
तिमैन्द्रसूनवीम् ५३

सानुषु वनेषूपभोग्यप्रदेशेषु गहनेषु दावेषु च जातास्तान् तथोक्तान् मृगानिति शेषः
चालयन् मुदितानां हरिणानां दशनैः क्षताः वीरुधो लता यस्यां तां इंद्रसूनोरिमां ऐंद्रसूनवीं वसंत्यत्रेति वसतिः ताश्रमं अ
नुवहिसर्त्तिभ्यश्चेति औणादिकोऽवसने इति प्रत्ययः प्राप ५३ रामजी रामजीसहाय

स इति॥ स शिवो घननीलं मेघमेचकं मुनेरभिमुखमुपस्थितमागतं पोत्रस्य मुखाग्रस्य निकषणेन उल्लेखनेन विभिन्ना विदारिता भूर्येन सतं मुखाग्रं क्रोडहलयोः पोत्रमित्यमरः॥ हलसूकरयोः पुव इति अत्र प्रत्ययः सूकरस्येदं सौकरं वराहं वपुर्दधानं तं दनुजं सद्‌कारम मासमाद॥५४॥ कथं ते इति॥ लक्ष्मीवान् मादुपधायाश्च मतोर्वोयवादिभ्य इति मतुपो मकारस्य वकारादेशः सशिवः सुर

सततमाससाद घननीलमभिमुखमवस्थितं मुनेः पोत्रनिकषणविभिन्नभुवं दनुजं दधानमति शौकरं वपुः ५४ कथां ते सुरसरितो निधाय सेनामन्वीतः सकतिपयैः किरातवर्यैः प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मी

म वानुपपदंस्य संप्रतस्थे ५५

सरितः कथं ते अनूपप्रांते जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः सेनां निधाय कतिपयैः किरातवर्यैः अन्वीतोऽनुगतः सन् ई गतावितिधातोः अनुपूर्वात्कर्मणि क्तः सगुल्मजालैर्लतोप्रतानसहितैः प्रच्छन्नः छादितः वारांतेत्यादिना निपातः अस्य वराहस्य पदमनुपदं पदानुसारे रोत्यर्थः संप्रतस्थे असमवप्रोपविभ्यः स्थः इत्यात्मनेपदं प्रहर्षिणी वृत्तम्॥५५॥ इति श्री महोपाध्याय

25

26

प्रतिदिशामिति ॥ अवगाधिपलक्षणाऽर्जुनेन विशिखानां संहत्या रुणापितान्निर्विग्रहो येषां तैः ॥ शिवबलैः ॥ रविकरग्लपितैः ॥ सूर्यकिरणशो
षितैर्वारिभिर्जलैरिव ॥ प्रतिदिशं ॥ परिमंडलतां दद्दे ॥ प्रतिदिशं मंडलाकारेण ॥ स्थितमित्यर्थः ॥ उपमेयं ॥ ९४ ॥ प्रविततेति ॥ पांडुसूनो ॥ प्रविततानि
निविस्तृतानि यानि शरजालानि तैः ॥ कृत्वाछन्नं विश्वांतरालं येन तस्मिन् ॥ अत एवाविर्मंडलश्चाविर्भूतमिति ॥ हे नो ॥ भूतार्थस्यानुप्रवे

प्रतिदिशं अवगाधिपलक्षणा विशिखवसंनतेनापितम्न्निभिः ॥ रविकरग्लपितैरिव वारिभिः शिवबलैः परिमंडलता
दधे ॥ ९४ ॥ प्रवितनशरजालछन्नविश्वांतराले विधुवति धनुराविर्मंडलं पांडुसूनो ॥ कथमपिजयलक्ष्मीर्भीतभी
तेव हातुं विषमनयनसेनापक्षपातं विषेहे ॥ ९५ ॥ इतिश्रीकिरातार्जुनीये महाकाव्ये लक्ष्मं के

शाङ्कृतस्याव्यस्या प्रयोगः ॥ धनुर्विधुवति सति ॥ भीतभीता इव भात प्रकाशाइव जयलक्ष्मीर्विषमनयनसेनापक्षपातं शिवसैन्यानुरागं ॥ कथ
मपि केनापि प्रकारेण ॥ महताकष्टेन वाम्यक्तुं हातुं ॥ विषेहे ॥ शशाक ॥ मालिनीवृत्तम् ॥ ९५ ॥ इतिश्रीमहोपाध्याय कोलाचलम
ल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां चतुर्दशः सर्गः ॥ १४ ॥ सं १९२८ जे प्र १५